འདི་འདྲ་ བསྡུས་པའི་ དཔེ་ ཡང་ ཡོད ༎ ༢༡

त्वय्येव त्वन्मुखं दृष्टं दृश्यते दिवि चन्द्रमाः ।
इयत्येव भिदा[11a]नान्येत्यसावतिशयोपमा ॥२२॥

ཁྱོད་ཀྱི་ཞལ་ནི་ཁྱོད་ཉིད་ལ། །
མཐོང་གི་ཟླ་བ་མཁའ་ལ་མཐོང་། །
འདི་ཉིད་ཁོ་ན་ཐ་དད་དེ། །
གཞན་མེད་ཅེས་འདི་ཁྱད་པར་དཔེ། ། ༢༢

मय्येवास्या मुखश्रीरित्यलमिन्दोर्विकत्थनैः ।
पद्मेपि सा यदस्त्येवेत्यसावुत्प्रेक्षितोपमा ॥२३॥

དེ་ཡི་བཞིན་དཔལ་ང་ཉིད་ལ། །
ཡོད་ཅེས་ཟླ་བ་སྙེམས་མི་དགོས། །
པདྨ་ལ་ཡང་དེ་ཡོད་ཕྱིར། །
ཞེས་པ་འདི་ནི་རབ་བརྟགས་དཔེ། ། ༢༣

यदि किञ्चिद्भवेत्पद्मं सुभ्रु विभ्रान्तलोचनं ।
तत्ते मुखश्रियन्धत्तामित्यसावद्भुतोपमा ॥२४॥

གལ་ཏེ་ པདྨ་ འགའ་ཞིག་ ལ །

སྨིན་ལེགས་ རྣམ་འཕྲུལ་ མིག་ལྡར་ ར །

ཁྱོད་ཀྱི་ བཞིན་གྱི་ དཔལ་ འཛིན་ ཏེ །

ཞེས་པ་ འདི་ ནི་ རྨད་བྱུང་དཔེ ॥ ༢༤

शशीत्युत्प्रेक्ष्य तन्वङ्गि त्वन्मुखन्त्वन्मुखाशया ।

इन्दुमप्यनुधावामीत्येषा मोहोपमा स्मृता ॥२५॥

ལུས་ཕྲ་ ཁྱོད་ གདོང་ རི་བོང་ཅན །

ཞེས་ བརྟགས་ ཁྱོད་ གདོང་ བསམས་པ་ ཡིས །

ཟླ་བ་ཡི་ ཡང་ རྗེས་སུ་བསྙེགས །

ཞེས་ འདི་ རྨོངས་པའི་དཔེ་རུ་ བཤད ॥ ༢༥

किम्पद्ममन्तर्भ्रान्तालि किन्ते लोलेक्षणं मुखं ।

मम दोलायते चित्तमितीयं संशयोपमा ॥२६॥

པད་ནང་ བུང་བ་ འཁོར་རམ་ ཅི །

ཁྱོད་ གདོང་ ལ་ མིག་ གཡོ་ འམ་ ཅི །

བདག་གི་ སེམས་ ནི་ རྣམ་པར་ གཡོ།
ཞེས་པ་ འདི་ནི་ ཐེ་ཚོམ་དཔེ ༎ ༢༦

न पद्मस्येन्दुनिग्राह्यस्येन्दुलज्जाकरी द्युतिः।
अतस्त्वन्मुखमेवेदमित्यसौ निर्णयोपमा ॥२७॥

ཟླ་བ་ སྤྲིངས་བྱེད་ མཛེས་པ་ འདི།
ཟླ་བས་ ཚར་གཅོད་ པདྨ་ མིན།
དེ་ཕྱིར་ ཁྱོད་ཀྱི་ གདོང་ ཉིད་དོ།
ཞེས་པ་ འདི་ ནི་ ངེས་པའི་དཔེ ༎ ༢༧

शिशिरांशुप्रतिद्वन्द्वि श्रीमत्सुरभिगन्धि च।
अम्भोजमिव ते वक्त्रमिति श्लेषोपमा मता ॥२८॥

འཇམ་ཟེར་ཅན་གྱི་ དགྲ་ཟླ་དང་།
དཔལ་དང་ལྡན་ དང་ དྲི་བཟང་གིས།
ཁྱོད་ཀྱི་གདོང་ ནི་ ཆུ་སྐྱེས་བཞིན།
ཞེས་པ་ སྦྱར་བའི་དཔེ་རུ་ བཤད ༎ ༢༨

सरूपशब्दवाच्यत्वात् सा समानोपमा यथा ।
[11b]बालेवोद्यानमालेयं सालकाननशोभिनी ॥२९॥

མཚུངས་པའི་སྒྲ་ཡིས་བརྗོད་བྱའི་ཕྱིར །
མཉམ་ཉིད་དཔེ་སྟེ་ཇི་ལྟར་ན །
སྐྱེད་ཚལ་ཕྲེང་འདི་བུ་མོ་བཞིན །
མཛེས་ལྡན་སཱ་ལ་ཀཱ་ན་ན ॥ ༢༨

पद्मं बहुरजश्चन्द्रः क्षयी ताभ्यान्तवाननम् ।
समानमपि सोत्सेकमिति निन्दोपमा *मता ॥३०॥

པདྨ་རྡུལ་མང་ཟླ་བ་འཛད །
དེ་དག་ལས་ནི་ཁྱོད་ཀྱི་བཞིན །
མཚུངས་པ་ལ་ཡང་ཁྱད་པར་བཅས །
ཞེས་པ་སྨད་པའི་དཔེ་རུ་འདོད ॥ ༣༠

ब्रह्मणोप्युद्भवः पद्मश्चन्द्रः शम्भुशिरोधृतः ।
तौ तुल्यौ त्वन्मुखेनेति सा प्रशंसोप*मेष्यते ॥३१॥

པདྨས་ ཚངས་པ་དག་ཀྱང་སྐྱེད །

ཟླ་བ་ བདེ་འབྱུང་གཙུག་ན་ འཛིན །

དེ་དག་ ཁྱོད་གདོང་ མཚུངས་ ཞེས་པ །

དེ་ ནི་ བསྔགས་པའི་དཔེར་ བརྗོད་ དོ ॥ ༣༡

चन्द्रेण त्वन्मुखं तुल्यमित्याचिख्यासु मे मनः ।

सगुणो वास्तु दोषो वेत्याचिख्यासोपमां विदुः ॥३२॥

ཡོན་ཏན་ལྡན་ ནམ་ སྐྱོན་ འགྱུར་ ཡང་ །

ཁྱོད་གདོང་ ཟླ་བ་ མཚུངས་ ཞེས་པ །

བརྗོད་འདོད་ བདག་གི་ ཡིད་ལ་ཡོད །

ཅེས་པ་ བརྗོད་འདོད་དཔེ་ ཞེས་ རིག ॥ ༣༢

शतपत्रं शरच्चन्द्रस्त्वदाननमिति त्रयम् ।

परस्परविरोधीति सा विरोधोपमोदिता ॥३३॥

འདབ་བརྒྱ་པ་ དང་ སྟོན་ཟླ་ དང་ །

ཁྱོད་ཀྱི་ གདོང་ དང་ གསུམ་པོ་ ནི །

ཕན་ཚུན་ རྣམ་པར་ འགལ་ ཞེས་བ །
དེ་ནི་ འགལ་བའི་དཔེར་ བརྗོད་དོ ॥ ༣༣

न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम् ।
कलङ्किनो जडस्येति प्रतिषेधोपमैव सा ॥३४॥

དྲི་མ་ལྡན་ ཞིང་ བླུན་གྱུར་པ །
ཟླ་བ་ལ་ ནི་ ཁྱོད་ གདོང་ དང་ །
འགྲན་པའི་ ནུས་པ་ ནམ་ཡང་ མེད །
ཅེས་པ་ དགག་པའི་དཔེ་ ཉིད་དོ ॥ ༣༤

मृगेक्षणाङ्कन्त्वद्वक्त्रम्मृगेणैवांकितः शशी ।
तथापि सम एवासौ नोत्कर्षीति चटूपमा ॥३५॥

ཁྱོད་ གདོང་ རི་དྭགས་མིག་གིས་མཚན །
ཟླ་བ་ རི་དྭགས་ཉིད་ཀྱིས་ མཚན །
དེ་ལྟ་ན་ ཡང་ འདི་ མཚུངས་ཉིད །
ཁྱད་འཕགས་ མིན་ ཞེས་ མཛེས་པའི་དཔེ ॥ ༣༥

न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी[12a] इमे ।
इति विस्पष्टसादृश्यात्तत्त्वाख्यानोपमैव सा ॥३६॥

འདི་ནི་ བཞིན་ ཉིད་ པདྨ་ མིན།
འདི་དག་ བུང་བ་ མ་ཡིན་ མིག།
ཅེས་པ་ རྣམ་གསལ་ མཚུངས་པ་ ལས།
དེ་ནི་ དེ་ཉིད་བརྗོད་པའི་དཔེ ॥ ༣༦

चन्द्रारविन्दयोः कान्तिमतिक्रम्य मुखन्तव ।
आत्मनैवाभवत्तुल्यमित्यसाधारणोपमा ॥३७॥

ཟླ་བ་ པདྨ་ དག་གི་ ནི།
མཛེས་པ་ ལས་ འདས་ ཁྱོད་ཀྱི་ གདོང་།
བདག་རང་ཉིད་ དང་ མཚུངས་པར་གྱུར།
ཞེས་པ་ ཐུན་མོང་མིན་པའི་དཔེ ॥ ༣༧

सर्वपद्मप्रभासारः समाहृत इव क्वचित् ।
त्वदाननं विभातीति तामभूतोपमां विदुः ॥३८॥

པདྨ་ མཛེས་པའི་ སྙིང་པོ་ ཀུན།
འགའ་ཞིག་ དག་ཏུ་ བསྡུས་པ་ བཞིན།
ཁྱོད་ཀྱི་ གདོང་ ནི་ རྣམ་མཛེས་ ཞེས།
དེ་ནི་ བྱུང་མིན་དཔེ་ ཞེས་ རིག ॥ ༣༨

इन्दुविम्बादिव विषं चन्दनादिव पावकः ।
परुषा वागितो वक्त्रादित्यसम्भावितोपमा ॥३९॥

ཟླ་བའི་གཟུགས་ ལས་ དུག་ བཞིན་ དང་།
ཙནྡན་ ལས་ ནི་ མེ་བཞིན་དུ།
ཞལ་ འདི་ ལས་ ནི་ རྩུབ་མོའི་ ཚིག།
ཅེས་པ་ སྲིད་པ་མིན་པའི་དཔེ ॥

चन्दनोदकचन्द्रांशुचन्द्रकान्तादिशीतलः ।
स्पर्शस्तवेत्यतिशयं* प्रथयन्ती बहूपमा ॥४०॥

ཙནྡན་ཆུ་ དང་ ཟླ་འོད་ དང་།
ཟླ་ཤེལ་ སོགས་ བཞིན་ ཁྱོད་ཀྱི་ནི།

རིག་པ་ བསེལ་ ཞེས་ ཁྱད་པར་ དག །
གསལ་བར་བྱེད་པ་ མང་བའི་དཔེ ༎ ༤༠

चन्द्रविम्बादिवोत्कीर्णं पद्मगर्भादिवोद्धृतम् ।
तव तन्वङ्गि वदनमित्यसौ विक्रियोपमा ॥४१॥

ལུས་ཕྲ་ ཁྱོད་ གདོང་ བཞིན་རས་ ནི
ཟླ་བའི་ དཀྱིལ་འཁོར་ ལས་ བརྡོན་ བཞིན །
པདྨའི་ ནང་ནས་ ཕྱུང་བ་ བཞིན །
ཞེས་པ་ འདི་ ནི་ རྣམ་འགྱུར་དཔེ ༎ ༤༡

पुष्ण्यातप इवाह्नीव पूषा व्योम्नीव वासरः ।
विक्रमस्त्वय्यधाल्लक्ष्मीमिति मालोपमैव सा ॥४२॥

འོད་ཀྱིས་ ཉི་བཞིན་ ཉི་མ་ ཡིས །
ཉིན་བཞིན་ ཉིན་གྱིས་ མཁའ་ལ་ བཞིན །
རྣམ་པར་གནོན་པས་ ཁྱོད་ལ་ དཔལ །
འཛིན་ ཞེས་ དེ་ནི་ ཕྲེང་བའི་དཔེ ༎ ༤༢

वाक्यार्थेनैव वाक्यार्थः [12b]कोपि यद्युपमीयते ।
एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधा ॥४३॥

གང་ཡང་ ངག་དོན་ ཉིད་ཀྱིས་ ནི །
གལ་ཏེ་ ངག་དོན་ ཉེར་འཇལ་ ན །
ངག་དོན་དཔེ་ སྤེ་ བཞིན་སྒྲ་ ནི །
གཅིག་ དང་ དུ་མས་ དེ་རྣམ་གཉིས ॥ ༤༣

त्वदाननमधीराक्षमाविर्दशनदीधिति ।
भ्रमद्भृङ्गमिवालक्ष्यकेसरं भाति पङ्कजं ॥४४॥

ཁྱོད་ གདོང་ མིག་ ནི་ མི་བརྟན་ ཞིང་ །
སོ་ཡི་འོད་ཟེར་ རབ་གསལ་བ །
འདབ་སྐྱེས་ བུང་བ་ གཡོ་ལྡན་ ནི །
གེ་སར་ དག་གིས་ མཚོན་བཞིན་ མཛེས ॥ ༤༤

नलिन्या इव तन्वङ्ग्यास्तस्याः पद्ममिवाननम् ।
मया मधुव्रतेनेव पायम्पायमरम्यत ॥४५॥

པདྨ་ཅན་ བཞིན་ ལུས་ཕྲ་མ །
པདྨ་ བཞིན་དུ་ དེ་ཡི་ གདོང་ །
སྦྲང་རྩི་ སྤྱོད་པས་ བཞིན་དུ་ ནི །
བདག་གེས་ འཐུངས་ཤིང་ འཐུངས་ཤིང་རྩེས ‖ ༤༥

वस्तु किञ्चिदुपन्यस्य न्यसनात् तत्सधर्मणः ।
साम्यप्रतीतिरस्तीति प्रतिवस्तूपमा यथा ॥४६॥

དངོས་པོ་ འགའ་ཞིག་ ཉེར་བཀོད་ནས །
དེ་ཡི་ཆོས་ མཐུན་ རབ་བཀོད་པ །
མཉམ་པ་ཉིད་དུ་ རྟོགས་པ་ཅན །
ཟླ་བོ་ དངོས་པོའི་དཔེ་ ཡིན་ དཔེར ‖ ༤༦

नैकोपि त्वादृशोद्यापि जायमानेषु राजसु ।
ननु द्वितीयो नास्त्येव पारिजातस्य पादपः ॥४७॥

རྒྱལ་པོ་རྣམས་ ནི་ སྐྱེས་གྱུར་ ཀྱང་ །
ད་ལྟ་ ཁྱོད་ འདྲ་ གཅིག་ ཀྱང་ མེད །

ཡོངས་འདུ་དག་གི་རྐང་འཕྲང་ནི།
གཉིས་པ་ ངེས་པར་ ཡོད་མ་ཡིན ༎ ༤༧

अधिकेन समाहृत्य हीनमेकक्रियाविधौ ।
यद्ब्रुवन्ति स्मृता सेयन्तुल्ययोगोपमा यथा ॥४८॥

ལྷག་པས་ དམན་པ་ བྱ་བ་ཡི།
ཚོག་ གཅིག་ ལ་ རབ་བསྡུས་ནས།
གང་ སྨྲས་ དེ་ནི་ མཚུངས་པ་ དག།
སྦྱོར་བའི་དཔེ་རུ་ བཤད་དེ་ དཔེར ༎ ༤༨

दिवो जागर्ति रक्षायै पुलोमारिर्भुवो भवान् ।
असुरास्तेन हन्यन्ते सावलेपा नृपास्त्वया ॥४९॥

པུ་ལོ་མའི་དགྲ་ མཐོ་རིས་ དང་།
ཁྱོད་ནི་ ས་སྐྱོང་ མེལ་ཚེ་བྱེད།
དེ་ཡིས་ དྲེགས་ལྡན་ ལྷ་མིན་ དང་།
ཁྱོད་ཀྱིས་ མི་ཡི་ བདག་པོ་ འཇོམས ༎ ༤༩

कान्त्या चन्द्रमसं [13a]धाम्ना सूर्यन्धैर्येण चार्णवम् ।
राजन्ननुकरोषीति सैषा हेतूपमा स्मृता ॥५०॥

རྒྱལ་པོ་ མཛེས་པས་ཟླ་བ་ དང་ །
གཟི་བྱིན་གྱིས་ ནི་ ཉི་མ་ དང་ །
བརྟན་པས་ རྒྱ་མཚོའི་ རྗེས་སུ་བྱེད །
ཅེས་པ་ འདི་ ནི་ རྒྱུ་དཔེར་ དྲན ॥ ༥༠

न लिङ्गवचने भिन्ने न हीनाधिकतापि वा ।
उपमादूषणायालं यत्रोद्वेगो न धीमतां ॥५१॥

བློ་ལྡན་ མི་དགྱེས་མེད་ གང་ལ །
ངེས་པར་ དཔེ་ཡི་སྐྱོན་ དག་ ནི །
ཐ་དད་ རྟགས་ དང་ ཚིག་ལ་མེད །
དམན་ དང་ ལྷག་པ་ ཉིད་ལའང་མེད ॥ ༥༡

स्त्रीव गच्छति षण्ढोयं वक्त्येषा स्त्री पुमानिव ।
प्राणा इव प्रियोयम्मे विद्या धनमिवार्जिता ॥५२॥

མ་ནིང་ འདི་འགྲོ་ བུད་མེད་ བཞིན།
བུད་མེད་ འདི་ སྐྱ་ སྐྱེས་པ་ བཞིན།
བདག་གི་ གྲོགས་ འདི་ སྲོག་རྣམས་ བཞིན།
རིག་པ་ རྣམས་ བསྒྲུབས་ ནོར་བཞིན་ནོ། ༥༢

भवानिव महीपाल देवराजो विराजते ।
अलमंशुमतः कक्षामारोढुन्तेजसा नृपः ॥५३॥

ས་གཞི་སྐྱོང་བ་ ཁྱོད་ བཞིན་དུ།
ལྷ་ཡི་རྒྱལ་པོ་ རྣམ་པར་མཛེས།
ཚ་ཟེར་ཅན་གྱི་ ནུས་པ་ལ།
མི་བདག་གཟི་ཡིས་ འགོང་བར་ནུས། ༥༣

इत्येवमादि सौभाग्यं न जहात्येव जातुचित् ।
अस्ति च क्वचिदुद्वेगः प्रयोगे वाग्विदां यथा ॥५४॥

ཞེས་པ་ དེ་ལྟ་བུ་ ལ་སོགས།
སྐལ་བཟང་ ནམ་ཡང་ གཏོང་མིན་ཉིད།

སྦྱོར་བ་ འགའ་ལ་ ངག་རིག་ རྣམས། །
མི་དགྲེས་པ་ ཡོད་ ཇི་ལྟར་ན ༎ ༥༤

हंसीव धवलश्चन्द्रः सरांसीवामलं नभः ।
भर्तृभक्तो भटः श्वेव खद्योतो भाति भानुवत् ।।५५।।

ངང་མོ་ བཞིན་དུ་ ཟླ་བ་ དཀར། །
མཚོ་ རྣམས་ བཞིན་དུ་ མཁའ་དྲི་མེད། །
ཁྱི་ བཞིན་ དཔའ་བོ་ ཇི་ལ་ གུས། །
ཉི་མ་ བཞིན་དུ་ མེ་ཁྱེར་ གསལ ༎ ༥༥

ईदृशं वर्ज्यते सद्भिः कारणं त्वत्र चिन्त्यताम् ।
इववद्वायथाशब्दाः समाननिभ[13b]सन्निभाः ।।५६।।

འདི་འདྲ་ སྤངས་ཏེ་ མཁས་རྣམས་ ཀྱིས། །
རྒྱུ་ ཡང་ འདིར་ ནི་ བསམ་པར་བྱོས། །
བཞིན་ལྟར་ལྟ་བུ་ཇི་ལྟར་སྒྲ །
མཐུན་མཚུངས་ཡང་དག་མཚུངས་ དང་ མཉམ ༎ ༥༦

तुल्यसंकाशनीकाशप्रकाशप्रतिरूपकाः ।
प्रतिपक्षप्रतिद्वन्द्विप्रत्यनीकविरोधिनः ॥५७॥

ཡང་དག་གསལ་དང་ངེས་པར་གསལ། །
རབ་གསལ་གཟུགས་ཀྱི་ཟླ་བོ་དང་། །
གཉེན་པོ་དང་ནི་དགྲ་ཟླ་དང་། །
སོ་སོར་རྟོག་དང་འགལ་དང་འདྲ ॥ ༥༧

सदृक्सदृशसंवादिसजातीयानुवादिनः ।
प्रतिविम्बप्रतिच्छन्दसरूपसमसम्मिताः ॥५८॥

བལྟ་བཅས་དང་ནི་བསྒྲུ་བ་དང་། །
རིགས་མཐུན་རྗེས་སུ་སྨྲ་བ་དང་། །
གཟུགས་བརྙན་དང་ནི་སོ་སོར་སྤྱོབ ། །
གཟུགས་མཚུངས་མཉམ་དང་ཡང་དག་འཇལ ॥

सलक्षणसदृक्षाभसपक्षोपमितोपमाः ।
कल्पदेशीयदेश्यादिः प्रख्यप्रतिनिधी अपि ॥५९॥

མཚན་ཉིད་མཐུན་འདྲ་མཚུངས་པ་དང་ །
མཐུན་ཕྱོགས་དཔེར་བྱས་དཔེ་དང་རྟོག །
དམན་དང་ཅུང་ཟད་དམན་སོགས་དང་ །
རབ་ཏུ་སྨྲ་དང་སོ་སོར་བཟློག ॥ ༥༩

सवर्णतुलितौ शब्दौ ये चान्यूनार्थवाचिनः ।
समासश्च बहुव्रीहिः शशाङ्कवदनादिषु ॥६०॥

རིགས་མཐུན་མཉམ་བྱས་ སྒྲ་དག་ དང་ །
གང་ཡང་ དམན་མིན་ དོན་ཅན་ཚིག །
འདྲུ་མང་པོ་ཡི་ཚིག་སྡུད་ དང་ །
རི་བོང་མཚན་མའི་གདོང་ཅན་ སོགས ॥ ༦༠

स्पर्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति ।
आक्रोशत्यवजानाति कदर्थयति निन्दति ॥६१॥

འགྲན་ དང་ རྒྱལ་ དང་ སྡང་བ་ དང་ །
འཁུ་ དང་ མི་མཐུན་ སྒྲོགས་པ་ དང་ །

འཐབ་པ་ དང་ ནི་ འཕྲུ་བ་ དང་ །
སྨྲ་འབེབས་བྱེད་ དང་ སྨོད་པ་ དང་ ॥ ६१

विडम्बयति संरुन्धे हसतीर्ष्यत्यसूयति ।
तस्य मुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति ॥६२॥

ཅོ་འདྲི་བ་ དང་ འགོག་པ་ དང་ །
གོད་ དང་ ཕྲག་དོག་ མི་བཟོད་ དང་ །
དེ་ཡི་ སྐལ་བཟང་ འཕྲོག་བྱེད་ དང་ །
དེ་ཡི་ མཛེས་པ་ ཟུམ་བྱེད་ དང་ ॥ ६२

तेन सार्धं विगृह्णाति तुलान्तेना]14a]धिरोहति ।
तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते ॥६३॥

དེ་དང་ འགྲན་ ལས་ ཚར་གཅོད་ དང་ །
དེ་དང་མཚུངས་ ལས་ ལྷག་པར་འཛེགས །
དེ་ཡི་རྗེས་སུ་ ཀང་འཛོག་ དང་ ।
དེ་ཡི་ནུས་པ་ ལ་ འཇུག་ དང་ ॥ ६३

तमन्वेत्यनुबध्नाति तच्छीलन्तन्निषेधति ।
तस्य चानुकरोतीति शब्दाः सादृश्यसूचिनः ॥६४॥

དེ་ཡི་རྗེས་འགྲོ་ རྗེས་སུ་འཆིང་ །
དེ་ཡི་ངང་ཚུལ་ དེ་འགོག་ དང་ །
དེ་ཡི་རྗེས་སུ་བྱེད་ ཅེས་པའི །
སྒྲ་ རྣམས་ མཚུངས་པ་ གསལ་བྱེད་ཡིན ॥ ༦༨

उपमैव तिरोभूतभेदा रूपकमिष्यते ।
यथा बाहुलता पाणिपद्मश्चरणपल्लवम् ॥६५॥

ཐ་དད་ སྣང་མིན་གྱུར་པ་ཡི །
དཔེ་ཉིད་ དག་ ནི་ གཟུགས་ཅན་ འདོད །
དཔུང་པ་ འཁྲི་ཤིང་ལག་པ་ ནི །
པདྨ་རྐང་པ་ཡལ་འདབ་བོ ॥ ༦༩

अंगुल्यः पल्लवान्यासन् कुसुमानि नखार्चिषः ।
बाहूलते वसन्तश्रीस्त्वन्नः प्रत्यक्षचारिणी ॥६६॥

ལག་པའི་འབྲི་ཤིང་ སོར་མོ་ རྣམས།
ཡལ་འདབ་ སེན་མོའི་འོད་ཟེར་ ནི།
མེ་ཏོག་ཏུ་གྱུར་ དཔྱིད་ཀྱི་དཔལ།
ཁྱོད་ནི་ ངེད་ལ་ མཚོན་སུམ་རྒྱུ།། ༦༦

इत्येतदसमस्ताख्यं समस्तं पूर्वरूपकं ।
स्मितम्मुखेन्दोर्ज्योत्स्नेति समस्तव्यस्तरूपकं ॥६७॥

ཞེས་པ་ འདི་ནི་ མ་བསྡུགས་དེ།
སྔ་མ་ བསྡུས་པའི་གཟུགས་ཅན་ནོ།
བཞིན་ ཟླ་ འཛུམ་པའི་ཟླ་འོད་ཅེས།
གཟུགས་ཅན་ བསྡུས་ དང་ མ་བསྡུས་པའོ།། ༦༧

ताम्राङ्गुलिदलश्रेणि नखदीधितिकेसरं ।
ध्रियते मूर्ध्नि भूपालैर्भवच्चरणपङ्कजं ॥६८॥

སོར་མོ་དམར་བའི་ འདབ་ཕྲེང་དང་།
སེན་མོའི་འོད་ཀྱི་ གེ་སར་ཅན།

ཁྱོད་ཀྱི་ ཞབས་ཀྱི་ ཆུ་སྐྱེས་ནི །
ས་སྐྱོང་རྣམས་ཀྱི་ སྤྱི་བོར་ འཛིན ॥ ༦༨

अंगुल्यादौ दलादित्वं पादे चारोप्य पद्मताम् ।
तद्योग्यस्थानविन्यासादेतत्सकलरूपकम् ॥६९॥

སོར་མོ་ ལ་སོགས་ འདབ་ སོགས་ དང་ །
རྐང་པས་ པདྨ་ཉིད་ བྱས་ནས །
དེ་འོས་ གནས་སུ་ རྣམ་བཀོད་པ །
འདི་ནི་ མཐའ་དག་ གཟུགས་ཅན་ཉིད । ༦༩

[14b] अकस्मादेव ते चण्डि स्फुरिताधरपल्लवम् ।
मुखं मुक्तारुचो धत्ते घर्माम्भःकणमञ्जरीः ॥७०॥

གཏུམ་མོ་ གློ་བུར་ ཉིད་དུ་ནི །
ཁྱོད་གདོང་ མཆུ་ཡི་ཡལ་འདབ་ གཡོ །
རྔུལ་གྱི་ཆུ་ཡི་ཐིགས་པ་ཡི །
ཏོག་པ་ མུ་ཏིག་ འོད་ཅན་ འཛིན ॥ ༧༠

मञ्जरीकृत्य घर्माम्बु पल्लवीकृत्य चाधरं ।
नान्यथा कृतमत्रास्यमतोऽवयवरूपकं ।।७१।।

འདིར་ནི་ རྔུལ་ཆུ་ ཏོག་པར་ བྱས།
མཆུ་ཡང་ ཡལ་འདབ་ཉིད་ བྱས་ཀྱི།
གདོང་ནི་ རྣམ་པ་ གཞན་ མ་བྱས།
དེ་ཕྱིར་ ཆ་ཤས་ གཟུགས་ཅན་ནོ། ༧༡

वल्लितभ्रु गलद्घर्मजलमालोहितेक्षणम् ।
विवृणोति मदावस्थामिदं वदनपङ्कजम् ।।७२।।

གདོང་པའི་ འདམ་སྐྱེས་ སྨིན་འཁྱོག་ ཅིང་།
རྔུལ་གྱི་ཆུ་ཟག་པ་ དང་།
མིག་དག་ ཀུན་ཏུ་ དམར་བ་ འདི།
མྱོས་པའི་གནས་སྐབས་ གསལ་བར་བྱེད། ༧༢

अविकृत्य मुखाङ्गानि मुखमेवारविन्दताम् ।
आसीद्गमितमत्रेदमतोऽवयविरूपकम् ।।७३।।

འདིར་ནི་ གདོང་པའི་ཆ་ཤས་དག །
རྣམ་འགྱུར་ མ་བྱས་ གདོང་པ་ཉིད །
པདྨར་ བཀོད་བྱས་ དེས་ན་ འདི །
ཆ་ཤས་ཅན་གྱི་ གཟུགས་ཅན་ནོ ॥ ༧༣

मद्पाटलगण्डेन रक्तनेत्रोत्पलेन ते ।
मुखेन मुग्धे सोप्येष जनो रागमयः कृतः ॥७४॥

མཛེས་མ་ སྨྱོས་པའི་ འཁུར་ཚོས་དམར །
མིག་གི་ ཨུཏྤལ་ དམར་པོ་ཅན །
ཁྱོད་ཀྱི་ གདོང་གིས་ སྐྱེ་བོ་ནི །
འདི་ཡང་ དམར་བའི་ རང་བཞིན་ བྱས ॥ ༧༤

एकाङ्गरूपकश्चैतदेवं द्विप्रभृतीनि च ।
अङ्गानि रूपयन्त्यत्र योगायोगौ भिदाकरौ ॥७५॥

དེ་ལྟར་ འདིར་ནི་ གཉིས་ སོགས་ཀྱི །
ཡན་ལག་ རྣམས་ ཀྱང་ གསལ་བྱེད་པ །

འདི་ནི་ ཡན་ལག་གཅིག་གཟུགས་ཅན། །
སྨིན་དང་མི་སྨིན་ ཐ་དད་བྱེད ། ༧༥

स्मितपुष्पोज्ज्वलं लोलनेत्रभृंगमिदं मुखं ।
इति [15a] पुष्पद्विरेफाणां सङ्गत्या युक्तरूपकं ॥७६॥

གདོང་ འདི་ འཛུམ་པའི་ མེ་ཏོག་འབར། །
གཡོ་བའི་ མིག་གི་ བུང་བ་ཅན། །
ཞེས་པ་ མེ་ཏོག་ བུང་བ་ དག །
འགྲོགས་པས་ལྡན་པའི་གཟུགས་ཅན་ནོ ། ༧༦

इदमार्द्रस्मितज्योत्स्नं स्निग्धनेत्रोत्पलं मुखं ।
इति ज्योत्स्नोत्पलायोगादयुक्तन्नाम रूपकम् ॥७७॥

གདོང་ འདི་ འཛུམ་ ག་ཞེར་ ཟླ་འོད་དང་ །
སྣུམ་པའི་ མིག་གི་ ཨུཏྤལ་ཅན། །
ཟླ་འོད་ ཨུཏྤལ་ མི་འོས་པས། །
འོས་མིན་ཞེས་པའི་ གཟུགས་ཅན་ནོ ། ༧༧

रूपणादङ्गिनोङ्गानां रूपणारूपणाश्रयात् ।
रूपकं विषमं नाम ललितं जायते यथा ॥७८॥

ཡན་ལག་ཅན་གཟུགས་ ཡན་ལག་ རྣམས །
གཟུགས་བྱས་ གཟུགས་སུ་མ་བྱས་ལ །
བརྗོད་པ་ མི་མཉམ་པ་ ཞེས་པའི །
གཟུགས་ཅན་ མཛེས་པ་ ཡིན་དེ་ དཔེར ॥ ༧༨

मदरक्तकपोलेन मन्मथस्त्वन्मुखेन्दुना ।
नर्तिते भ्रूलतेनालं मर्दितुम्भुवनत्रयं ॥७९॥

མྱོས་པའི་ མཁུར་ཚོས་རབ་ དམར་ཞིང་ །
སྨིན་མའི་འཁྲི་ཤིང་ གར་བྱེད་པ །
ཁྱོད་ གདོང་ ཟླ་བས་ ཡིད་སྨྲུབ་ཀྱིས །
འཇིག་རྟེན་ གསུམ་པོ་ གཞོམ་པར་ནུས ॥ ༧༩

हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः ।
जयत्यसुरनिःशंकसुरानन्दोत्सवध्वजः ॥८०॥

ཛ་ཧྣུའི་བུ་མོའི་ཆུ་གོས་ནི།

འཕྲོག་བྱེད་ཀང་པའི་རྩེར་ལྡན་པ།

ལྷ་མིན་དོག་མེད་ལྷ་དགའ་བའི།

དགའ་སྟོན་རྒྱལ་མཚན་རྒྱལ་གྱུར་ཅིག ༎ ༨༠

विशेषेणसमग्रस्य रूपं केतोर्यदीदृशं ।

पादे तदर्पणादेतत् सविशेषणरूपकं ॥८१॥

གང་ཞིག་ཁྱད་པར་ཚོགས་པ་ཡི།

གཟུགས་ཀྱི་རྒྱལ་མཚན་འདི་འདྲ་བ།

དེ་ནི་ཀང་པ་ལ་བཀོད་དེ།

ཁྱད་པར་དང་བཅས་གཟུགས་ཅན་ནོ༎ ༨༡

न मीलयति पद्मानि न नभोप्यवगाहते ।

त्वन्मुखेन्दुर्ममासूनां हरणायैव प [15b] श्यति ॥८२॥

པདྨ་རྣམས་ནི་མི་ཟུམ་ཞིང་།

ནམ་མཁའ་ལ་ཡང་མི་འགྲོ་བ།

ཁྱོད་གདོང་ཟླ་བས་ བདག་གི་ནི །
སྲོག་རྣམས་ འཕྲོག་པ་ ཉིད་དུ་ བསྡུ ॥ ༨༢

अक्रिया चन्द्रकार्याणामन्यकार्यस्य च क्रिया ।
अत्र सन्दर्श्यते तस्माद्विरुद्धन्नाम रूपकं ॥८३॥

ཟླ་བའི་ བྱ་བ་ བྱ་མིན་ དང་ །
གཞན་ གྱི་བྱ་བའི་ བྱ་བ་ འདིར །
ཡང་དག་ བསྟན་ ཏེ་ དེ་ ཡི་ ཕྱིར །
འགལ་བ་ ཞེས་བྱའི་ གཟུགས་ཅན་ནོ ॥ ༨༣

गाम्भीर्येण समुद्रोसि गौरवेणासि पर्वतः ।
कामदत्वाच्च लोकानामसि त्वं कल्पपादपः ॥८४॥

ཁྱོད་ནི་ ཟབ་པས་རྒྱ་མཚོ་དང །
བརླིང་བ་ ཉིད་ ཀྱིས་ རི་བོ་ ཡིན །
འཇིག་རྟེན་ རྣམས་ལ་ འདོད་པ་ནི །
སྟེར་ ཕྱིར་ དཔག་ བསམ་ཤིང་འདྲ་ངོ་ ॥ ༨༤

गाम्भीर्यप्रमुखैरत्र हेतुभिः सागरो गिरिः ।
कल्पद्रुमश्च क्रियते तदिदं हेतुरूपकं ॥८५॥

འདིར་ནི་ ཟབ་པ་ལ་སོགས་པའི །
རྒྱུ་རྣམས་ དག་གིས་ རྒྱ་མཚོ་ རི །
དཔག་ བསམ་ཤིང་ ཡང་ བྱེད་པས་ན །
འདི་ནི་ རྒྱུ་ཡི་གཟུགས་ཅན་ནོ ༎ ༨༥

राजहंसापभोगार्हं भ्रमरप्रार्थ्यसौरभं ।
सखि वक्त्राम्बुजमिदन्तवेति श्लिष्टरूपकं ॥८६॥

གྲོགས་མོ་ ཁྱོད་ཀྱི་ གདོང་ པད་འདི །
རཱ་ཛ་ཧཾ་ས་སས་ ཉེར་ སྤྱད་འོས །
དྲི་ཞིམ་ བུང་བས་དོན་ གཉེར་འོས །
ཞེས་པ་ སྦྱར་བའི་གཟུགས་ཅན་ནོ ༎ ༨༦

इष्टं साधर्म्यवैधर्म्यदर्शनाद्गौणमुख्ययोः ।
उपमाव्यतिरेकाख्यं रूपकद्वितयं यथा ॥८७॥

གཙོ་བོ་ དང་ནི་ ཕལ་པ་ལ །
ཆོས་མཐུན་ ཆོས་མི་མཐུན་ མཐོང་བས །
དཔེ་དང་ ལྡོག་པ་ཅན་ ཞེས་པའི །
གཟུགས་ཅན་ རྣམ་པ་གཉིས་ འདོད་ དཔེར ॥ ༨༧

अयमालोहितच्छायो मदेन मुखचन्द्रमाः ।
सन्नद्धोदयरागस्य चन्द्रस्य प्रतिगर्जति ॥८८॥

མྱོས་པས་ ཀུན་དུ་ དམར་བ་ ཡིས །
བཀབ་པ་ བཞིན་ གྱི་ ཟླ་བ་ འདི །
འཆར་ཀའི་ དམར་བ་ ཕན་ཚོགས་པའི །
ཟླ་བ་ལ་ནི་ རབ་ཏུ་འགྲན ॥ ༨༨

चन्द्रमाः पीयते देवैर्मया त्वन्मुखचन्द्रमाः ।
असमग्रोप्यसौ [16a] शश्वदयमापूर्णमण्डलः ॥८९॥

ལྷ་ རྣམས་ ཀྱིས་ ནི་ ཟླ་བ་ འཐུངས །
བདག་གིས་ ཁྱོད་གདོང་ཟླ་བ་ འཐུངས །

འདི་ནི་ གང་བ་ མ་ཡིན་ ཡང་ །
འདི་ནི་ དུག་ཏུ་ དཀྱིལ་འཁོར་ རྫོགས ॥ ༨༩

मुखचन्द्रस्य चन्द्रत्वमित्थमन्योपतापिनः ।
न ते सुन्दरि संवादीत्येतदाक्षेपरूपकं ॥९०॥

མཛེས་མ་ ཁྱོད་ གདོང་ ཟླ་བ་ནི །
འདི་ལྟར་ གཞན་ དག་ གདུང་བྱེད་པས །
ཟླ་བ་ཉིད་དུ་ བརྗོད་མིན་ ཞེས །
དེ་ནི་ སྨད་པའི་ གཟུགས་ཅན་ནོ ॥ ༩༠

मुखेन्दुरपि ते चण्डि मां निर्दहति निर्दयं ।
भाग्यदोषान्ममैवेति तत्समाधानरूपकं ॥९१॥

གདུམ་མོ་ ཁྱོད་ གདོང་ ཟླ་བས་ ཀྱང་ །
བརྩེ་བ་མེད་པར་ བདག་ སྲེག་པ །
བདག་ཉིད་ སྐལ་བ་ ཉིད་ཀྱི་ སྐྱོན །
ཞེས་འདི་ མཉམ་འཛོག་ གཟུགས་ཅན་ནོ ॥ ༩༡

मुखपङ्कजरङ्गेऽस्मिन् भ्रूलतानर्तकी तव ।
लीलानृत्यं करोतीति रम्यं रूपकरूपकं ॥९२॥

ཁྱོད་གདོང་ འདམ་སྐྱེས་ རོ་ར་ འདིར །
སྨིན་མའི་ འཁྲི་ཤིང་ གར་མཁན་མ །
རོལ་སྒེག་ དགའ་བས་ གར་བྱེད་དོ །
ཞེས་པ་ གཟུགས་ཅན་གྱི་གཟུགས་ཅན ॥ ༩༢

नैतन्मुखमिदम्पद्मं न नेत्रे भ्रमराविमौ ।
एतानि केसराण्येव नैता दन्तार्चिषस्तव ॥९३॥

འདི་ནི་ གདོང་མིན་ འདི་ པདྨ །
འདི་དག་ མིག་མིན་ འདི་ བུང་བ །
འདི་ རྣམས་ གེ་སར་ ཉིད་ ཡིན་ འདི །
ཁྱོད་ཀྱི་ སོ་ཡི་ འོད་ཟེར་ མིན ॥ ༩༣

मुखादित्वं निवर्त्यैव पद्मादित्वेन रूपणात् ।
उद्भावितगुणोत्कर्षन्तत्त्वापह्नवरूपकं ॥९४॥

གདོང་ ལ་སོགས་པ་ཉིད་ བཟློག་སྟེ །
པདྨ་ ལ་སོགས་ གཟུགས་བྱས་པས །
ཡོན་ཏན་ ཁྱད་འཕགས་ གསལ་བྱེད་པ །
དེ་ཉིད་ བསྟོན་དོར་ གཟུགས་ཅན་ནོ ॥ ༩༤

न पर्यन्तो विकल्पानां रूपकोपमयोरतः ।
दिङ्मात्रं दर्शितं धीरैरनुक्तमनुमीयताम् ॥९५॥

གཟུགས་ཅན་དཔེ་ཡི་ རྣམ་རྟོག་ རྣམས །
མཐའ་ཡོད་མ་ཡིན་ དེ་ཡི་ཕྱིར །
བློ་ལྡན་ རྣམས་ཀྱི་ ཕྱོགས་ཙམ་ བསྟན །
མ་བརྗོད་ རྗེས་སུ་དཔག་པར་བྱ ॥ ༩༥

[16b] **जातिक्रियागुणद्रव्यवाचिनैकत्र वर्त्तिना ।**
सर्ववाक्योपकारश्चेत् तमाहुर्दीपकं यथा ॥९६॥

རིགས་ དང་ བྱ་བ་ ཡོན་ཏན་ རྫས །
ཚིག་ གཅིག་ ལ་ནི་ གནས་པ་ ཡིས །

གལ་ཏེ་ ངག་ ཀུན་ལ་ ཕན་ན །

དེ་ནི་ གསལ་བྱེད་དུ་བརྗོད་ དཔེར ॥ ༩༦

पवनो दक्षिणः पर्णं जीर्णं हरति वीरुधाम् ।

नवाय च नताङ्गीनाम् मानभङ्गाय कल्पते ॥९७॥

ལྷོ་ཡི་རླུང་ གིས་ འཁྲི་ཤིང་གི །

འདབ་མ་རྙིང་པ་ ལྷགས་པར་བྱེད །

དུད་པའི་ལུས་ཅན་མ་རྣམས་ཀྱི །

ཁེངས་པ་ གསར་དུ་ འཇོམས་པར་བྱེད ॥ ༩༧

चरन्ति चतुरम्भोधिवेलोद्यानेषु दन्तिनः ।

चक्रवालाद्रिकुञ्जेषु कुन्दभासो गुणाश्च ते ॥९८॥

རྒྱུ་འོ་ ཆུ་གཏེར་ བཞི་ ངོགས་ཀྱི །

སྐྱེད་མོས་ཚལ་དུ་ སོ་ཅན་དེ །

ཁོར་ཡུག་ རི་བོའི་ ཁོངས་སུ་ ཡང་ །

ཁྱོད་ཀྱི་ ཡོན་ཏན་ ཀུནྡའི་ འོད ॥ ༩༨

ཙནྡན་བྱུག་པ་ལྷུང་བ་ཡང་།
མཆོན་ལྷུང་འཁྲུམས་པ་རྣམས་ལའི། ༡༠༣

जलं जलधरोद्गीर्णङ्कुलङ्गृहशिखण्डिनां ।
चलञ्च तडितान्दाम बलं कुसुमधन्वनः ॥१०४॥

ཆུ་འཛིན་གྱིས་ནི་རབ་གཏོར་ཆུ།
ཁྱིམ་གྱི་གཙུག་ཕུད་ལྡན་པའི་ཚོགས།
གློག་གི་ཕྲག་པ་གཡོ་བ་ཡང་།
མེ་ཏོག་གཞུ་ཅན་དག་གི་དཔུང་། ༡༠༤

त्वया कर्णोत्पलं कर्णे स्मरेणास्त्रं शरासने ।
मयापि मरणे चेतस्त्रयमेतत्समं कृतं ॥१०५॥

ཁྱོད་ཀྱིས་ཨུཏྤལ་རྣ་བ་ལ།
འདོད་པས་མདའ་ནི་མདའ་སྣུན་ལ།
ངས་ཀྱང་སེམས་ནི་འཆི་བ་ལ།
གསུམ་པོ་འདི་ནི་མཉམ་དུ་བྱས། ༡༠༥

शुक्लः श्वेतार्चिषो वृद्ध्यै पक्षः पञ्चशरस्य सः ।
स च रागस्य रागोपि यूनां रत्युत्सवश्रियः ॥१०६॥

དཀར་ཕྱོགས་ཀྱིས་ ནི་ འོད་དཀར་ཅན །
འཕེལ་བྱེད་ དེ་ཡིས་ མདའ་ལྔ་པ །
དེས་ ཀྱང་ ཆགས་ མདངས་ ཆགས་མདངས་ཀྱིས །
ན་ཆུང་ དགའ་བའི་ དགའ་སྟོན་དཔལ ॥ ༡༠༦

इत्यादिदीपकत्वेपि पूर्वपूर्वव्यपेक्षिणी ।
वाक्यमाला प्रयुक्तेति तन्मालादीपकं मतं ॥१०७॥

ཞེས་ སོགས་ གསལ་བྱེད་ ཡིན་ མོད་ ཀྱང་ །
སྔ་མ་སྔ་མ་ལ་ ལྟོས་པའི །
ངག་གི་ ཕྲེང་བ་ རབ་ལྡན་ ཕྱིར །
དེ་ནི་ ཕྲེང་བའི་གསལ་བྱེད་དོ ॥ ༡༠༧

अवलेपमनङ्गस्य वर्धयन्ति वलाहकाः ।
कर्शयन्ति तु धर्मस्य मारुतोद्धूतशीकराः ॥१०८॥

རླུང་གིས་ གཙུབས་པའི་ཆུ་ཕྲིགས་ཅན།
སྤྲིན་གྱིས་ ལུས་མེད་དག་གི་ ནི།
ཨ་བ་ལེ་པ་ འཕེལ་བར་བྱེད།
རྡུལ་གྱི་ དག་ནི་ སེལ་བར་བྱེད། ༡༠༨

अवलेपपदेनात्र वलाहकपदेन च ।
क्रिये विरुद्धे संयुक्ते [176]तद्विरुद्धार्थदीपकं ॥१०९॥

འདིར་ནི་ སྤྲིན་གྱི་ཚིག་དག་ དང་།
ཨ་བ་ལེ་པའི་ ཚིག་དག་གིས།
བྱ་བ་ འགལ་བར་ལྡན་པ་ དེ།
འགལ་བའི་དོན་གྱི་གསལ་བྱེད་དོ། ༡༠༩

हरत्याभोगमाशानां गृह्णाति ज्योतिषां गणम् ।
आदत्ते चाद्य मे प्राणानसौ जलधरावली ॥११०॥

ཆུ་འཛིན་ དག་གི་ ཕྲེང་བ་ འདིས།
ཕྱོགས་རྣམས་ཀྱི་ ནི་ གོ་སྐབས་ འཕྲོག།

སྐར་མ་ ཡི་ ནི་ ཚོགས་ རྣམས་ འཛིན།
དེང་ཡང་ བདག་གི་སྐྲོག་ རྣམས་ ལེན ༎ ༡༡༠

अनेकशब्दोपादानात् क्रियैवैकात्र दीप्यते ।
यतो जलधरावल्यास्तस्मादेकार्थदीपकं ॥१११॥

གང་ཕྱིར་ཆུ་ འཛིན་ ཕྲེང་བ་ཡི།
བྱ་བ་ གཅིག་ ཉིད་ གསལ་བྱེད་ འདིར།
དུ་མའི་ སྒྲ་ཡིས་ ཉེར་བླངས་པ།
དེ་ཕྱིར་ དོན་གཅིག་གསལ་བྱེད་དོ ༎ ༡༡༡

हृद्यगन्धवहास्तुङ्गास्तमालश्यामलत्विषः ।
दिवि भ्रमन्ति जीमूता भुवि चैते मतंगजाः ॥११२॥

དྲི་ཡི་བཞོན་པ་ ཡིད་འོང་ མཐོ།
སྔོ་བསངས་ ཏ་མཱ་ལ་ཡི་འོད།
སྤྲིན་ ནི་ མཁའ་ལ་ རྒྱུ་བྱེད་ དེ།
གླང་ཆེན་ འདི་དག་ ས་ལའོ ༎ ༡༡༢

अत्र धर्मैरभिन्नानामभ्राणां दन्तिनामपि ।
भ्रमणेनैव सम्बन्ध इति श्लिष्टार्थदीपकं ॥११३॥

འདིར་ ནི་ ཆོས་དག་ ཐ་དད་ མིན །
སྤྲིན་དང་ གླང་པོ་ རྣམས་དག་ ཀྱང་ །
ཀྱུ་བ་ཉིད་ ཀྱིས་ འབྲེལ་བའི་ ཕྱིར །
སྦྱར་བའི་དོན་གྱི་ གསལ་བྱེད་དོ ॥ ༡༡༣

अनेनैव प्रकारेण शेषाणामपि दीपके ।
विकल्पानामनुगतिर्विधातव्या विचक्षणैः ॥११४॥

རྣམ་པ་ འདི་ཉིད་ ཁོ་ན་ཡིས །
གསལ་བྱེད་ལ་ནི་ རྣམ་རྟོག་པ །
ལྷག་མ་ རྣམས་ ཀྱང་ རྗེས་འགྲོ་ཡིས །
མཁས་པ་ རྣམས་ ཀྱིས་ རྟོགས་པར་བྱ ॥ ༡༡༤

अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरित्यपि ।
दीपकस्थान एवेष्टमलंकारत्रयं यथा ॥११५॥

གསལ་བྱེད་ཀྱི་ ནི་ གནས་ཉིད་དུ །
དོན་བསྐོར་ དང་ ནི་ ཚིག་བསྐོར་ དང་ །
གཉིས་ཀ་ བསྐོར་བ་ ཅེས་པ་ ཡི །
རྒྱན་ གསུམ་པོ་དག་ འདོད་དེ་ དཔེར ॥ ༡༡༥

विकसन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः ।
उन्मीलन्ति च [18a] कन्दल्यो दलन्ति ककुभानि च ॥११६॥

ཀ་དམྦ་ ནི་ རྣམ་པར་རྒྱས །
ཀུ་ཊ་ཛོ་དྒ་མ་ རབ་གསལ །
ཀནྡ་ལུ་ནི་ རབ་དུ་ བྱེ །
ཀ་ཀུ་བྷ་ ཡང་ གྲེས་པར་གྱུར ॥ ༡༡༦

उत्कण्ठयति मेघानां माला वर्गङ्कलापिनां ।
यूनां चोत्कण्ठयत्यद्य मानसम्मकरध्वजः ॥११७॥

སྤྲིན་གྱི་ ཕྲེང་བ་ དག་གིས་ ནི །
རྨ་བྱའི་ ཚོགས་ རྣམས་ སྐྲ་སྐྲོག་བྱེད །

ཆུ་སྲིན་ རྒྱལ་མཚན་ཅན་ གྱིས་ དེང་ །
ན་ཆུང་ རྣམས་ ཡིད་ འདོད་ལྡན་བྱེད ॥ ༡༡༧

जित्वा विश्वम्भवानद्य विहरत्यवरोधनैः ।
विहरत्यप्सरोभिस्ते रिपुवर्गो दिवं गतः ॥११८॥

ཀུན་ལས་ རྒྱལ་ནས་ དེ་རིང་ ཁྱོད །
བཙུན་མོ་ རྣམས་ དང་ རྩེ་བར་བྱེད །
ཁྱོད་ཀྱི་དགྲ་སྡེ་ མཐོ་རིས་ སོང་ །
ལྷ་མོ་ རྣམས་ དང་ རྩེ་བར་བྱེད ॥ ༡༡༨

प्रतिषेधोक्तिराक्षेपस्त्रैकाल्यापेक्षया त्रिधा ।
अथास्य पुनराक्षेप्यभेदानन्त्यादनन्तता ॥११९॥

དགག་པ་ བརྗོད་པ་ འགོག་པ་ སྟེ །
དུས་གསུམ་ལ་ལྟོས་ རྣམ་པ་ གསུམ །
ཅི་སྟེ་ དེ་ཡང་ དགག་བྱ་ཡི །
དབྱེ་བ་ མཐའ་ཡས་ ཕྱིར་ མཐའ་ཡས ॥ ༡༡༩

अनङ्गः पञ्चभिः पुष्पैर्विश्वंव्यजयतेषुभिः ।
इत्यसंभाव्यमथवा विचित्रवस्तुशक्तयः ॥१२०॥

ལུས་མེད་ཀྱི་ནི་མེ་ཏོག་གི། །
མདའ་ལྔས་ཀུན་ལས་རྒྱལ་བར་གྱུར། །
ཅེས་པ་མི་སྲིད་ཡང་ན་ནི། །
དངོས་པོའི་ནུས་པ་རྣམ་པར་བཀྲ། ། ༡༢༠

इत्यनङ्गजयायोगबुद्धिर्हेतुबलादिह ।
प्रवृत्तैवं यदाक्षिप्ता वृत्ताक्षेपस्तदीदृशः ॥१२१॥

ཞེས་པ་འདིར་ནི་རྒྱུ་སྟོབས་ཀྱིས། །
ལུས་མེད་རྒྱལ་བར་མི་རིགས་བློ། །
དེ་ལྟར་གྱུར་བཀག་གང་གི་ཕྱིར། །
བྱུང་བ་འགོག་པ་དེ་འདི་འདྲ། ། ༡༢༡

कुतः कुवलयं कर्णे करोषि कलभाषिणि ।
किमपाङ्गमपर्याप्तमस्मिन्कर्मणि मन्यसे ॥१२२॥

སྐྱན་སྒྲོགས་མ་ དག་ ཅི་ཡི་ཕྱིར །
ཉ་བ་ལ་ནི་ ཨུཏྤལ་ འཇུག །
ལས་ འདི་ལ་ ནི་ ཟུར་མིག་དག །
ཡོངས་རྫོགས་ མིན་པར་ སེམས་སམ་ ཅི ॥ ༢༣༣

स वर्तमानाक्षेपोयं कुर्वत्ये [186] वासितोत्पलं ।
कर्णे काचित्प्रियेणैवं चाटुकारेण रुध्यते ॥१२३॥

འགའ་ཞིག་ དཀར་མིན་ ཨུཏྤལ །
ཉ་བར་འཇུག་ལ་ མཛའ་བོ་ཡིས །
དེ་ལྟར་ བསྟོད་པས་ མཛེས་བྱེད་པ །
འདི་ནི་ མཐོན་གྱུར་ འགོག་པ་འོ ॥ ༢༣༣

सत्यं ब्रवीमि न त्वम्मान्द्रष्टुं वल्लभ लप्स्यसे ।
अन्यचुम्बनसंक्रान्तलाक्षारक्तेन चक्षुषा ॥१२४॥

ཇོ་བོ་ བདེན་པར་ སྨྲ་འོ་ བདག །
གཞན་ དང་ཚུམྦ་ནས་ འཕོས་པའི །

རྒྱ་སྐྱེགས་ཀྱིས་དམར་ མིག་གིས་ནི །
ཁྱོད་ཀྱིས་ མཐོང་བར་འགྱུར་ མ་ལགས ॥ ༡༢༣

सोयं भविष्यदाक्षेपः प्रागेवातिमनस्विनी ।
कदाचिदपराधोस्य भावीत्येवमरुन्ध यत् ॥१२५॥

སྔར་ཉིད་ ཤིན་ཏུ་ཁེངས་ལྡན་མས །
ནམ་ཞིག་ འདི་ཡིས་ གནོད་པ་ དག །
འབྱུང་བ་ དེ་ལྟར་ འགོག་བྱེད་པ །
འདི་ནི་ འབྱུང་འགྱུར་ འགོག་པའོ ॥ ༡༢༤

तव तन्वङ्गि मिथ्यैव रूढमङ्गेषु मार्दवं ।
यदि सत्यम्मृदून्येव किमकाण्डे रुजन्ति मां ॥१२६॥

ལུས་ཕྲ་ ཁྱོད་ཀྱི་ ཡན་ལག་ རྣམས །
འཇམ་པ་ ཉིད་དུ་ གནས་པ་ བརྫུན །
གལ་ཏེ་ བདེན་པར་ འཇམ་པ་ན །
གློ་བུར་དུ་ བདག་ ཅི་ལ་ གདུང་ ॥ ༡༢༥

धर्माक्षेपोयमाक्षिप्तमङ्गनागात्रमार्दवं ।
कामुकेन यदत्रैवं कर्मणा तद्विरोधिना ॥१२७॥

གང་ཕྱིར་ དེ་ལྟར་ འདོད་ལྡན་ གྱིས །
དེ་ དང་ འགལ་བའི་ལས་ ཀྱིས་ ནི ॥ ༡༢༧
བུད་མེད་ ལུས་ འདི་ འཇམ་པ་ ཉིད །
འགོག་པ་ འདི་ ནི་ ཆོས་ འགོག་པའོ །

सुन्दरी सा नवेत्येष विवेकः केन जायते ।
प्रभामात्रं हि तरलं दृश्यते तत्र नाश्रयः ॥१२८॥

དེ་ནི་ མཛེས་མ་འམ་ ཡིན་ཞེས །
རྣམ་རིག་ འདི་ནི་ ཅི་ལས་སྐྱེ །
དེར་ནི་ འོད་ཙམ་ གཡོ་བ་ ཉིད །
མཐོང་བར་གྱུར་གྱི་ རྟེན་མ་ཡིན ॥ ༡༢༨

धर्म्याक्षेपोयमाक्षिप्तो धर्मीधर्मं प्रभाह्वयं ।
अनुज्ञायात्र तद्रूपमत्याश्चर्यं विवक्षता ॥१२९॥

གང་ འདིར་ གཟུགས་ཅན་མ་ ངོ་མཚར །
བཟློད་པར་ འདོད་པས་ འོད་ཅེས་པའི །
ཆོས་ འདི་ ཁས་བླངས་ ཆོས་ཅན་ དག །
འགོག་འདི་ ཁས་བླངས་ ཆོས་ཅན་ དག ༎ ༡༢༩

चक्षुषी [19a] तव रज्येते स्फुरत्यधरपल्लवः ।
भ्रुवौ च भुग्ने न तथाप्यदुष्टस्यास्ति मे भयं ॥१३०॥

ཁྱོད་ཀྱི་ མིག་ནི་ དམར་གྱུར་ ཅིང་ །
མཆུ་ཡི་ ཡལ་འདབ་ གཡོ་བ་ དང་ །
སྨིན་མ་ འཁྲིག་སྟེ་ དེ་ལྟ་ནའང་ །
ཉེས་པ་ མེད་པས་ བདག་ མི་འཇིགས ༎ ༡༣༠

स एष कारणाक्षेपः प्रधानं कारणं भियः ।
स्वापराधो निषिद्धोत्र यत्प्रियेण पटीयसा ॥१३१॥

གང་ཕྱིར་ མཛའ་བོ་ མཁས་པ་ ཡིས །
འདི་དག་ འདིར་ནི་ རྒྱུ་ འགོག་པའོ །

འཛིགས་པ་ ཡི་ནི་ ཀྲུ་ཡི་གཙོ །
རང་གི་ ཉེས་པ་ འགོག་བྱེད་པ ॥ ༡༣༡

दूरे प्रियतमः सोयमागतो जलदागमः ।
दृष्टाश्च फुल्ला निचुला न मृता चास्मि किं न्वहं ॥१३२॥

མཛའ་བོ་ དག་ ནི་ རིང་ན་ གནས །
ཆུ་འཛིན་ བགྲོད་ལྡན་ འདི་ནི་ འོངས །
ནི་ཙུ་ལ་ ཡང་ ཀྲུས་པར་ མཐོང་ །
བདག་གི་ མིན་པ་ འདི་ ཅི་ག ། ༡༣༢

कार्याक्षेपः स कायस्य मरणस्य निवर्त्तनात् ।
तत्कारणमुपन्यस्य दारुणं जलदागमं ॥१३३॥

དེ་ཀྲུ་ ཆུ་འཛིན་ བགྲོད་པ་ ནི །
མི་བཟད་པ་ དག་ ཉེར་ བཀོད་ ནས །
འབྲས་བུ་ འཆི་བ་ བཟློག་པའི་ཕྱིར །
དེ་ནི་ འབྲས་བུ་ འགོག་པ་འོ ॥ ༡༣༣

न चिरं मम तापाय तव यात्रा भविष्यति ।
यदि यास्यसि यातव्यमलमाशंकयात्र ते ॥१३४॥

གལ་ཏེ་ གཤེགས་ན་ གཤེགས་པར་ མཛོད།
ཁྱོད་ཀྱི་ བགྲོད་པས་ བདག་ལ་ ནི།
གདུང་བ་ ཡུན་རིང་ འབྱུང་མི་འགྱུར།
འདི་ལ་ ཁྱོད་ནི་ དོགས་མི་འཚལ། ༡༣༨

इत्यनुज्ञामुखेनैव कान्तस्याक्षिप्यते गतिः ।
मरणं सूचयन्त्येव सोनुज्ञाक्षेप उच्यते ॥१३५॥

ཞེས་པ་ འཆི་བ་ གསལ་བྱེད་པས།
རྗེས་གནང་ ཉིད་ཀྱི་ སྒོ་ནས་ ནི།
མཛའ་བའི་ བགྲོད་པ་ འགོག་བྱེད་པ།
འདི་ནི་ རྗེས་གནང་ འགོག་པར་ བརྗོད། ༡༣༩

धनञ्च बहु लभ्यन्ते सुखं क्षेमं च वर्त्मनि ।
न च मे प्राणसं[19b]देहस्तथापि प्रिय मास्म गाः ॥१३६॥

ནོར་ནི་ མང་པོ་ རྙེད་ འགྱུར་ ཞིང་ །
ལམ་དུ་ ཡང་ནི་ བདེ་ ཞིང་ དགེ །
བདག་སྒྲོག་ལ་ ཡང་ ཁྲ་ཚོམ་མེད །
འོན་ཀྱང་ མཛའ་བོ་ འགྲོ་མི་བྱ ॥ ༡༣༦

प्रत्याचक्षाणया हेतून् प्रिययात्राविबन्धिनः ।
प्रभुत्वेनैव रुद्धस्तत्प्रभुत्वाक्षेप ईदृशः ॥१३७॥

མཛའ་བོ་ འགྲོ་བར་ སྤྲོར་བ་ ཡི །
རྒྱུ་ རྣམས་ དག་ ནི་ རབ་བཤད་ནས །
དབང་ཉིད་ ཀྱིས་ ནི་ དེ་ འགོག་པ །
འདི་འདྲ་ དབང་གིས་ འགོག་པ་འོ ॥ ༡༣༧

जीविताशा बलवती धनाशा दुर्बला मम ।
गच्छ वा तिष्ठ वा कान्त स्वावस्था तु निवेदिता ॥१३८॥

བདག་ནི་ གསོན་རེ་ སྟོབས་དང་ལྡན །
ནོར་གྱི་ བསམ་པ་ སྟོབས་ལྡན་མིན །

མཛའ་བོ་ གཤེགས་ སམ་ བཞུགས་ལགས་སམ།
རང་གི་ གནས་སྐབས་ སྨོས་པ་ ལགས། ༡༣༨

असावनादराक्षेपो यदनादरवद्वचः ।
प्रियप्रयाणं रुन्धत्या प्रयुक्तमिह रक्तया ॥१३९॥

གང་ཕྱིར་ འདིར་ནི་ ཆགས་ལྡན་མས།
མཛའ་བོའི་ བགྲོད་པ་ འགོག་བྱེད་ཅིང་།
མ་གུས་བཞིན་དུ་ ཚིག་ སྨྲོར་བ།
འདི་ནི་ མ་གུས་པས་ འགོག་པའོ། ༡༣༩

गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥१४०॥

མཛའ་བོ་ གལ་ཏེ་ གཤེགས་ན་ བཞུད།
ཁྱོད་ཀྱི་ ལམ་ནི་ ཞིས་གྱུར་ཅིག།
གང་དུ་ ཁྱོད་ནི་ གཤེགས་པ་ དེར།
བདག་ ཀྱང་ སྐྱེ་བ་ ཉིད་ གྱུར་ཅིག། ༡༤༠

इत्याशीर्वचनाक्षेपो यदाशीर्वादवर्त्मना ।
स्वावस्थां सूचयन्त्यैव कान्तयात्रा निषिध्यते ॥१४१॥

དེ་ལྟར་ཤིས་བརྗོད་ལམ་གྱིས་གང་།
རང་གི་གནས་སྐབས་གསལ་བྱེད་མས།
མཛའ་བོའི་བགྲོད་པ་འགོག་བྱེད་པ།
འདི་ནི་ཤིས་བརྗོད་ཀྱིས་འགོག་པའོ། ༡༤༡

यदि सत्यैव यात्रा ते काप्यन्या मृग्यतां त्वया ।
अहमद्यैव रुद्धास्मि रन्ध्रापेक्षेण मृत्युना ॥१४२॥

གལ་ཏེ་ཁྱོད་འགྲོ་བདེན་ཉིད་ན།
ཁྱོད་ཀྱིས་གཞན་པ་འགའ་ཞིག་ཚོལ།
བདག་ནི་གླག་ཚོལ་འཆི་བ་ཡིས།
དེ་རིང་ཉིད་དུ་འགོག་པར་འགྱུར། ༡༤༢

इत्येष [20a] परुषाक्षेपः परूषाक्षरपूर्वकम् ।
कान्तस्याक्षिप्यते यस्मात्प्रस्थानं प्रेमनिघ्नया ॥१४३॥

གང་ཕྱིར་ མཛའ་བའི་ དབང་གྱུར་མས།
མཛའ་བོའི་ བགྲོད་པ་འགོག་བྱེད་པ།
ཚིག་རྒྱབ་ ཡི་གེ་ སྦྲོན་འགྲོ་ཅན།
འདི་ནི་ རྒྱབ་ མོས་ འགོག་པ་འོ། ༡༤༣

गन्ता चेद्गच्छ तूर्णन्ते कर्णं यान्ति पुरा रवाः ।
आर्त्तबन्धुमुखोद्गीर्णाः प्रयाणप्रतिबन्धिनः ॥१४४॥

གལ་ཏེ་ གཤེགས་ན་ མྱུར་དུ་ བཞུད།
ཕྱི་ནས་ གཉེན་ འདུན་ འཁྲུགས་པའི་ཁས།
བསྒྲགས་པའི་ཆོ་ངེ་ འགྲོ་བ་ ཡི།
གེགས་གྱུར་ ཁྱོད་ཀྱི་ རྣ་བར་ འོང་། ༡༤༤

साचिव्याक्षेप एवैष यदत्र प्रतिषिध्यते ।
प्रियप्रयाणं साचिव्यं कुर्वत्येकान्तरक्तया ॥१४५॥

གང་ཕྱིར་ འདིར་ནི་ མཐའ་གཅིག་ཏུ།
ཆགས་མས་ གྲོས་ཉིད་ བྱེད་པ་ ཡིས།

མཛའ་བོའི་ བགྲོད་པ་ འགོག་པ་ འདི །
གྲོས་ཉིད་ ཀྱིས་ནི་ འགོག་པ་འོ ॥ ༡༤༥

गच्छेति वक्तुमिच्छामि मत्प्रियं त्वत्प्रियैषिणी ।
निर्गच्छति मुखाद्वाणी मा गा इति करोमि किम् ॥१४६॥

བཞུད་ཅེས་ ཁྱོད་དགྱེས་ བརྗོད་ འདོད་ཀྱང་ །
བདག་ཉིད་ དགའ་བར་བྱེད་པའི་ ཚིག །
མ་གཤེགས་ ཅེས་པ་ ཁ་ནས་ནི །
བྱུང་བར་ གྱུར་ལ་ བདག་ ཅི་ བྱེད ॥ ༡༤༦

यत्नाक्षेपस्स यत्नस्य कृतस्यानिष्टवस्तुनि ।
विपरीतफलोत्पत्तेरानर्थक्योपदर्शनात् ॥१४७॥

མི་འདོད་ དངོས་ལ་ འབད་བྱས་པས །
འབྲས་བུ་ ཕྱིན་ཅི་ལོག་ བསྐྱེད་པས །
དོན་མེད་ ཉེ་བར་ བསྟན་པའི་ ཕྱིར །
དེ་ནི་ འབད་པས་ འགོག་པའོ ॥ ༡༤༧

क्षणदर्शनविघ्नाय पक्ष्मस्पन्दाय कुप्यतः ।
प्रेम्णः प्रयाणन्त्वं ब्रूहि मया तस्येष्टमिष्यते ॥१४८॥

སྐད་ཅིག་ལྟ་བའི་ གེགས་བྱེད་པའི །
རྫི་མ་ བསྐྱོད་པ་ལ་ ཁྲོ་བ །
ཁྱོད་ཀྱིས་ མཛའ་བར་ འགྲོ་བ་ སྨྲོས །
བདག་ནི་ དེ་ཡི་ འདོད་པ་ འདོད ॥ ༡༤༨

अयं परवशाक्षेपो यत्प्रेमपरतन्त्र[20b]या ।
तया निषिध्यते यात्रेत्यस्यार्थस्योपसूचनात् ॥१४९॥

གང་ཕྱིར་ མཛའ་བོའི་ གཞན་དབང་མ །
དེ་ཡིས་ བགྲོད་པ་ འགོག་བྱེད་ཅིང་ །
དོན་ འདི་ ཉེ་བར་གསལ་བྱེད་ ཕྱིར །
འདི་ནི་ གཞན་དབང་ འགོག་པ་འོ ॥ ༡༤༩

सहिष्ये विरहं नाथ देह्यदृश्याञ्जनं मम ।
यदक्तनेत्राङ्कन्दर्पः प्रहन्तुं मां न पश्यति ॥१५०॥

མགོན་པོ་ འབྲལ་བ་ བཟོད་པར་ བགྱི །
གང་གིས་ མིག་ བསྙོས་ བདག་ལ་ནི །
འདོད་པས་ བསྟུན་དུ་ མི་མཐོང་བའི །
མཐོང་མིན་ མིག་སྨན་ བདག་ལ་ སྩོལ ༎ ༢༤༠

दुष्करं जीवनोपायमुपन्यस्योपरुध्यते ।
पत्युः प्रस्थानमित्याहुरुपायाक्षेपमीदृशं ॥१५१॥

འཚོ་བའི་ཐབས་ ནི་ དཀའ་བ་དག །
ཉེ་བར་བཀོད་ནས་ བདག་པོ་ནི །
འགྲོ་བ་ འགོག་པར་བྱེད་པའི་ ཕྱིར །
འདི་འདྲ་ ཐབས་ ཀྱིས་ འགོག་པར་བརྗོད ༎ ༢༤༡

प्रवृत्तैव प्रयामीति वाणी वल्लभ ते मुखात् ।
अयतापि त्वयेदानीम् मन्दप्रेम्णा ममास्ति किम् ॥१५२॥

ཇོ་བོ་ ཁྱོད་ཀྱི་ ཞལ་ནས་ ཚིག །
བདག་ འགྲོ་ ཞེས་པ་ ངེས་པར་བྱུང་ །

མཛའ་བ་ དམན་པ་ ཁྱོད་ཀྱིས་ ད །
མ་སྦྱིན་ན་ ཡང་ བདག་ལ་ཅི ॥ ༡༥༢

रोषाक्षेपोयमुद्रिक्तस्नेहनिर्यन्त्रणात्मया ।
संरब्धया प्रियारब्धं प्रयाणं यन्निवार्यते ॥१५३॥

མཛའ་བ་ ཀྲུས་པས་ མ་བསྐུམས་པའི །
བདག་ཉིད་ ཁྲོ་བས་ མཛའ་བོ་ཡི །
འགྲོ་བ་ རྩོམ་པ་ བཟློག་པ་ གང་ །
འདི་ནི་ ཁྲོ་བས་ འགོག་པ་འོ ॥ ༡༥༣

नाघ्रातं न कृतं कर्णे स्त्रीभिर्मधुनि नार्पितं ।
त्वद्द्विषां दीर्घिकास्वेव*विशीर्णञ्जीर्णमुत्पलं ॥१५४॥

མ་བསྐུམས་ བུ་མོའི་རྣ་བ་ལ །
མ་བྲུས་ ཆང་ལ་ མ་བདབ་པར །
ཁྱོད་ཀྱི་ དགྲ་ཡི་ རྫིང་ ཉིད་དུ །
ཨུཏྤལ་ སྔོན་པོ་ ཟེགས་པར་གྱུར ॥ ༡༥༤

असावनुक्रोशाक्षेपः सानुक्रोशमिवोत्पले ।
व्यावर्त्त्य कर्म तद्योग्यं शोच्यावस्थोपदर्शनात् ॥१५५॥

སྙིང་རྗེར་ བཅས་ བཞིན་ ཨུཏྤལ་ལ །
དེ་ ཆོས་ ལས་ནི་ བཟློག་བྱས་ནས །
སྐྱུ་ངན་འོས་པའི་ སྐབས་ སྟོན་ ཕྱིར །
འདི་ནི་ སྙིང་རྗེས་ འགོག་པ་འོ ༎ ༡༥༥

अर्थो न संभृतः कश्चिन्न वि[21a]द्या काचिदर्जिता ।
न तपः संचितं किंचिद्गतश्च सकलं वयः ॥१५६॥

དོན་ནི་ འགའ་ཡང་ ཚོགས་མ་བྱས །
རིག་པ་ འགའ་ཡང་ མ་བསྒྲུབས་ ཤིང་ །
དཀའ་ཐུབ་ འགའ་ ཡང་ མ་བསགས་པར །
ན་ཚོད་ མཐའ་དག་ སོང་བར་གྱུར ༎ ༡༥༦

असावनुशयाक्षेपो यस्मादनुशयोत्तरं ।
अर्थार्ज्जुनादेर्व्यावृत्तिर्दर्शितेह गतायुषा ॥१५७॥

གང་ཕྱིར་ འདིར་ནི་ ཆོ་སོང་བས །
དོན་སྒྲུབ་ ལ་སོགས་ འགོག་པ་ནི །
འགྲོད་པ་ གཙོ་བོར་ སྟོན་བྱེད་པ །
འདི་ནི་ འགྲོད་པས་ འགོག་པ་འོ ॥

किमयं शरदंभोदः किं वा हंसकदम्बकम् ।
रुतन्नूपुरसंवादि श्रूयते तन्न तोयदः ॥१५८॥

ཅི་འདི་ སྟོན་གྱི་ཆུ་འཛིན་ ནམ །
ཡང་ན་ ངང་པའི་ཚོགས་སམ་ཅི །
སྒྲ་ནི་ རྐང་གདུབ་ཀྱི་ འདྲ་བ །
ཐོས་པས་ དེ་ནི་ ཆུ་འཛིན་ མིན ॥

इत्ययं संशयाक्षेपः संशयो यन्निवर्त्यते ।
धर्मेण हंससुलभेनास्पृष्टघनजातिना ॥१५९॥

ཆོས་འདི་ ངང་པ་ལ་ ཡོད་ཅིང་ །
སྤྲིན་གྱི་ རིགས་ལ་ མ་རེག་པས །

གང་ཞིག་ ཟླ་ཆོས་ ཟློག་བྱེད་པ།
འདི་ནི་ ཟླ་ཆོས་ འགོག་པ་འོ༎ ༡༥༩

अमृतात्मनि पद्मानां द्वेष्टरि स्निग्धतारके।
मुखेन्दौ तव सत्यस्मिन्नपरेण किमिन्दुना ॥१६०॥

བདུད་རྩིའི་ བདག་ ཉིད་ པདྨ་ལ།
སྣང་ ཞིང་ སྣུམ་པའི་ ཏཱ་ར་ཀེ།
ཁྱོད་ གདོང་ ཟླ་བ་ འདི་ ཡོད་ བཞིན།
ཟླ་བ་ གཞན་གྱིས་ ཅི་ཞིག་ བྱ༎ ༡༦༠

इति मुख्येन्दुराक्षिप्तो गुणान्गौणेन्दुवर्त्तिनः।
तत्समान्दर्शयित्वेति श्लिष्टाक्षेपस्तथाविधः ॥१६१॥

ཕལ་པའི་ཟླ་བ་ལ་ བརྟེན་པ།
དེ་ མཚུངས་ ཡོན་ཏན་ བསྟན་བྱས་ནས།
གཙོ་བོའི་ ཟླ་བ་ འགོག་བྱེད་པ།
རྣམ་པ་ དེ་ལྟར་ སྦྱར་བས་ འགོག༎ ༡༦༡

चित्रमाक्रान्तविश्वोपि विक्रमस्ते न तृप्यति ।
कदा वा दृश्यते तृप्तिरुद्दीर्णस्य हविर्भु[21b]जः ॥१६२॥

ཐམས་ཅད་མནན་ ཡང་ ཁྱོད་ཀྱི་ནི ॥
རྣམ་གནོན་ ཚིམ་པ་ མེད་པ་ མཚར །
ཡང་ན་ བསྲེག་བྱ་ འབར་བ་ལ །
ཚིམ་པ་དག་ ནི་ ནམ་ཞིག་ མཐོང་ ॥ ༡༦༢

अयमर्थान्तराक्षेपः प्रक्रान्तोयं निवर्त्यते ।
विस्मयोऽर्थान्तरस्येह दर्शनात्तत्सधर्मणः ॥१६३॥

གང་ཕྱིར་ འདིར་ནི་ དོན་ གཞན་དག །
དེ་ཡི་ ཆོས་ མཚུངས་ བསྟན་བྱས་ནས །
ཡ་མཚན་ རྨོམ་པ་ འགོག་བྱེད་པ ॥
འདི་ནི་ དོན་ གཞན་ འགོག་པ་འོ ॥ ༡༦༣

न स्तूयसे नरेन्द्र त्वं ददासीति कदाचन ।
स्वमेव मत्वा गृह्णन्ति यतस्त्वद्धनमर्थिनः ॥१६४॥

སྦྲིན་པ་པོ་ ཞེས་ ནམ་ཡང་ ནི །
མི་དབང་ ཁྱོད་ལ་ མི་བསྟོད་དེ །
གང་ཕྱིར་ སློང་བས་ ཁྱོད་ཀྱི་ནོར །
རང་གི་ ཉིད་དུ་ བསམས་ནས་ ལེན ॥ ༡༦༣

इत्येवमादिराक्षेपो हेत्वाक्षेप इति स्मृतः ।
अनयैव दिशान्येपि विकल्पाः शक्यमूहितुं ॥१६५॥

ཅེས་པ་ ལ་སོགས་ འགོག་པ་ནི །
རྒྱུས་ འགོག་པ་ ཞེས་ བཤད་པ་སྟེ །
ཕྱོགས་ འདི་ཉིད་ཀྱིས་ རྣམ་པར་རྟོག །
གཞན་པ་ དག་ ཀྱང་ དཔག་པར་ནུས ॥ ༡༦༤

ज्ञेयः सोर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन ।
तत्साधनसमर्थस्य न्यासो योन्यस्य वस्तुनः । १६६।।

གང་ཞིག་ དངོས་ འགའ་ རབ་བཀོད་ནས །
དེ་ཡི་ སྒྲུབ་བྱེད་ ནུས་པ་ཅན །

དངོས་པོ་ གཞན་དག་ འགོད་པ་དེ །
དོན་གཞན་ བཀོད་པར་ ཤེས་པར་བྱ ॥ ༡༦༦

विश्वव्यापी विशेषस्थः श्लेषाविद्धो विरोधवान् ।
अयुक्तकारी युक्तात्मा युक्तायुक्तो विपर्ययः ॥१६७॥

ཀུན་ཁྱབ་ ཁྱད་པར་ལ་ གནས་ དང་ །
སྦྱར་བ་ཅན་ དང་ འགལ་བ་ཅན །
མི་འོས་བྱེད་ དང་ འོས་པའི་བདག །
འོས་དང་ མི་འོས་ བཟློག་པ་འོ ॥ ༡༦༧

इत्येवमादयो भेदाः प्रयोगेष्वस्य लक्षिताः ।
उदाहरणमालैषां रूपव्यक्त्यै निदर्श्यते ॥१६८॥

འདི་ཡི་ དབྱེ་བ་ དེ་ལྟ་ སོགས །
སྦྱོར་བ་ རྣམས་ལ་ རབ་ཏུ་མཚོན །
འདི་རྣམས་ རང་བཞིན་ གསལ་བྱའི་ཕྱིར །
དཔེར་ བརྗོད་ ཕྲེང་བ་ བསྟན་པར་བྱ ॥ ༡༦༨

भगवन्तौ जगन्नेत्रे सूर्यचन्द्रमसावपि ।
पश्य गच्छत प[22a]वास्तं नियतिः केन लङ्घ्यते ॥१६९॥

ལེགས་ལྡན་ འགྲོ་བ་རྣམས་ཀྱི་མིག །
ཉི་མ་ དང་ནི་ ཟླ་བ་ ཡང་ །
ནུབ་པར་གྱུར་པ་ ཉིད་ལ་ ལྟོས །
ངེས་པ་ལ་ ནི་ སུ་ཡིས་ འགོངས ॥ ༡༦༩

पयोमुचः परीतापं हरन्त्येते शरीरिणां ।
नन्वात्मलाभो महतां परदुःखोपशान्तये ॥१७०॥

ཆུ་འཛིན་ འདི་དག་ ལུས་ཅན་ གྱི །
ཡོངས་སུ་གདུང་བ་ འཕྲོག་པར་བྱེད །
ཆེན་པོ་རྣམས་ ཀྱིས་ བདག་ ཐོབ་ གྲགས །
གཞན་ གྱི་ སྡུག་བསྔལ་ ཞི་ སླད་དུའོ ॥ ༡༧༠

उत्पादयति लोकस्य प्रीतिं मलयमारुतः ।
ननु दाक्षिण्यसम्पन्नः सर्व्वस्य भवति प्रियः ॥१७१॥

མ་ལ་ཡ་ཡི་ རླུང་གིས་ ནི །
འཇིག་རྟེན་ དགའ་བ་ སྐྱེད་པར་བྱེད །
ཏུ་ཀྵི་ཀུ་ དང་ ཡང་དག་ལྡན །
ཀུན་གྱི་ སྙིང་སྡུག་ མ་ཡིན་ནམ ॥ ༡༧༡

जगदाह्लादयत्येष मलिनोपि निशाकरः ।
अनुगृह्णाति हि परान् सदोषोपि द्विजेश्वरः ॥१७२॥

མཚན་མོར་བྱེད་ འདི་ དྲི་མ་ དང་ །
ལྡན་ཡང་ འགྲོ་བ་ དགའ་བ་སྐྱེད །
གཉིས་སྐྱེས་དབང་པོ་ སྐྱོན་ལྡན་ ཡང་ །
གཞན་དག་ རྗེས་སུ་འཛིན་པར་ནུས ॥ ༡༧༢

मधुपानकलात्कण्ठान्निर्गतोप्यलिनां ध्वनिः ।
कटुर्भवति कर्णस्य कामिनां पापमीदृशम् ॥१७३॥

སྦྲང་རྩི་ འཐུངས་པའི་ མགྲིན་ སྐྱན་ ལས །
བྱུང་བ་ བུང་བའི་ སྒྲ་དག་ ཀྱང་ །

རྣ་བར་ རྩུབ་པ་ ཉིད་ འགྱུར་བ །
འདོད་ལྡན་ རྣམས་ཀྱི་ སྡིག་ འདི་འདྲ ॥ ༡༧༣

अयं मम दहत्यङ्गमम्भोजदलसंस्तरः ।
हुताशनप्रतिनिधिर्दाहात्मा ननु युज्यते ॥१७४॥

ཆུ་སྐྱེས་འདབ་མའི་མལ་སྟན་ འདིས །
བདག་གི་ ལུས་ འདི་ གདུང་བར་བྱེད །
སྲེག་པའི་ བདག་ ཉིད་ བསྲེག་ཟ་ དང་ །
འདྲ་བས་ རིགས་པ་ མ་ཡིན་ ནམ ॥ ༡༧༤

क्षिणोतु कामं शीतांशुः किं वसन्तो दुनोति मां ।
मलिनाचरितं कर्म सुरभेर्नन्वसाम्प्रतम् ॥१७५॥

བསིལ་ཟེར་ཅན་གྱིས་ ཉམས་བྱེད་ མོད །
དཔྱིར ི་ ཅི་ལ་ གདུང་ །
དྲི་མ པའི་ ལས །
དག མིན་ནམ ॥ ༡༧༥

कु[22b]मुदान्यपि दाहाय किमङ्ग कमलाकरः ।
न हीन्दुगृह्येषूग्रेषु सूर्यगृह्यो मृदुर्भवेत् ॥१७६॥

ཀུ་མུད་ལྡན་ ཡང་ སྲེག་བྱེད་ན །
པདྨའི་འབྱུང་གནས་ ཅིས་མི་བྱེད །
ཟླ་བས་ གཟུང་རྣམས་ ཟུབ་པས་ན །
ཉི་མས་ གཟུང་བ་ འཇམ་མི་འགྱུར ॥ ༡༧༦

शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः ।
तत्र यद्भेदकथनं व्यतिरेकः स कथ्यते ॥७७॥

སྒྲ་འཇུག་པ་འམ་ རྟོགས་པ་ ཡིས །
དངོས་པོ་ གཉིས་ནི་ མཚུངས་ གྱུར་པ །
དེ་ཡི་ དབྱེ་བ་ བརྗོད་པ་ གང་ །
དེ་ནི་ ལྡོག་པ་ཅན་ ཞེས་ བརྗོད ॥ ༡༧༧

धैर्यमाहात्म्यलावण्यप्रमुखैस्त्वमुदन्वतः ।
गुणैस्तुल्योसि भेदस्तु वपुषैवेदृशेन ते ॥१७८॥

བརྟན་ དང་ ཆེ་བའི་ བདག་ཉིད་དང་ །
ལཱ་བ་ཧུ་ སོགས་ ཡོན་ཏན་གྱིས །
ཁྱོད་དང་ རྒྱ་མཚོ་ མཚུངས་ ཐ་དད །
ཁྱོད་ལུས་ འདི་འདྲ་ ཉིད་ ཀྱིས་སོ ‖ ༡༧༨

इत्येकव्यतिरेकोयं धर्मेणैकत्र वर्तिना ।
प्रतीतिविषयप्राप्तेर्भेदस्योभयवर्त्तिनः ॥१७९॥

གཅིག་ལ་ གནས་པའི་ཆོས་ ཀྱིས་ནི །
གཉི་ག་ལ་ གནས་ ཐ་དད་ དག །
རྟོགས་པའི་ ཡུལ་དུ་གྱུར་པའི་ ཕྱིར །
འདི་ནི་ གཅིག་གི་ ལྡོག་པ་ཅན ‖ ༡༧༩

अभिन्नवेलौ गम्भीरावम्बुराशिर्भवानपि ।
असावञ्जनसङ्काशस्त्वन्तु चामीकरच्छविः ॥१८०॥

ཆུ་ཡི་ཕུང་པོ་དག་ དང་ ཁྱོད །
མཚམས་ ལས་ མི་འདའ་ ཟབ་པ་སྟེ །

འདི་ནི་ མིག་སྨན་ དང་ མཚུངས་ལ །
ཁྱོད་ནི་ གསེར་གྱི་ མདོག་ཅན་ནོ ॥ ༡༨༠

उभयव्यतिरेकोयमुभयोर्भेदकौ गुणौ ।
कार्ष्ण्यं पिशंगता चोभौ यत्पृथग्दर्शिताविह ॥१८१॥

གང་ཕྱིར་ འདིར་ནི་ གཉི་ག་ཡི །
འབྱེད་བྱེད་ ཡོན་ཏན་ ནག་པོ་ དང་ །
སེར་པོ་དག་ནི་ ཐ་དད་ བསྟན །
འདི་ནི་ གཉི་གའི་ ལྡོག་པ་ཅན ॥ ༡༨༡

त्वं समुद्रश्च दुर्वारौ महासत्त्वसतेजसौ ।
इयता युवयोर्भेदः स ज[23a]लात्मा पटुर्भवान् ॥१८२॥

ཁྱོད་དང་ རྒྱ་མཚོ་ དུ་རྦཱ་རོ །
མཧཱ་སཏྭ་ ཏེ་ཛེ་ བཅས །
འདི་ཡིས་ ཁྱེད་ གཉིས་ ཐ་དད་དེ །
དེ་ནི་ ཆུ་བདག་ ཁྱོད་མཁས་སོ ॥ ༡༨༢

स एष श्लेषरूपत्वात् सश्लेष इति गृह्यतां ।
साक्षेपश्च सहेतुश्च दर्श्यते तदपि द्वयं ॥१८३॥

འདི་ནི་ སྦྱར་བའི་ ཚུལ་ལྡན་ཕྱིར །
སྦྱར་བ་ཅན་ ཞེས་ གཟུང་བར་མཛོད །
འགོག་པ་ཅན་ དང་ གཏན་ཚིགས་ཅན །
གཉིས་པོ་ དེ་ཡང་ བསྟན་པར་བྱ ॥ ༡༨༣

स्थितिमानपि धीरोपि रत्नानामाकरोपि सन् ।
तव कक्षां न यात्येव मलिनो मकरालयः ॥१८४॥

ལུགས་དང་ལྡན་ ཞིང་ བརྟན་པ་ དང་ །
རིན་ཆེན་འབྱུང་གནས་ ཡིན་ མོད་ ཀྱང་ །
དྲི་མ་ལྡན་པ་ ཆུ་སྲིན་གནས །
ཁྱོད་ཀྱི་འགྲན་ཟླར་འགྱུར་མ་ཡིན ॥ ༡༨༤

वहन्नपि महीं कृत्स्नां सशैलद्वीपसागराम् ।
भर्तृभावाद्भुजंगानां शेषस्त्वत्तो निकृष्यते ॥१८५॥

རི་གླིང་རྒྱ་མཚོར་ བཅས་པ་ཡི །
ས་གཞི་ མཐའ་དག་ འཛིན་ མོད་ཀྱང་ །
ལག་འགྲོ་རྣམས་ ཀྱི་ རྗེར་ གྱུར་ ཕྱིར །
ལྷག་མ་ཅན་ནི་ ཁྱོད་པས་དམན ॥ ༡༨༥

शब्दोपादानसादृश्यो व्यतिरेकोयमीदृशः ।
प्रतीयमानसादृश्योप्यस्ति सोनुविधीयते ॥१८६॥

སྒྲ་དག་ འཇུག་པར་ མཚུངས་པ་ཡི །
ཟློག་པ་ཅན་ནི་ འདི་འདྲ་སྟེ །
རྟོགས་པར་གྱུར་པ་ མཚུངས་པ་ ཡང་ །
ཡོད་པ་ དེ་ནི་ རྗེས་སུ་སྒྲུབ ॥ ༡༨༦

त्वन्मुखङ्कमलं चेति द्वयोरप्यनयोर्भिदा ।
कमलं जलसंरोहि त्वन्मुखं त्वदुपाश्रयं ॥१८७॥

ཁྱོད་ཀྱི་ གདོང་དང་ པདྨ་སྟེ །
འདི་ གཉིས་ཀྱི་ ནི་ ཁྱད་པར་ ཡང་ །

པདྨ་ ཆུ་ལས་ སྐྱེས་པ་ དང་ །
ཁྱོད་ གདོང་ ཁྱོད་ལ་ བརྟེན་པ་འདོ ॥ ༡༨༧

अभ्रूविलासमस्पृष्टमदरागम् मृगेक्षणं ।
इदन्तु नयनद्वंद्वं तव तद्गुणभूषितम् ॥१८८॥

རི་དྭགས་ མིག་ལ་ སྨིན་ སྐྱིག་ དང་ །
སྨྱོས་པའི་དམར་བས་ རེག་པ་མེད །
ཁྱོད་ཀྱི་ མིག་ནི་ གཉིས་པོ་ འདི །
ཡོན་ཏན་ དེ་དག་ ཉིད་ཀྱིས་ བརྒྱན ॥ ༡༨༨

पूर्व्वस्मिन्भेदमात्रोक्तिरस्मिन्नाधिक्यदर्श[23b]नं ।
साद्रृश्यव्यतिरेकश्च पुनरन्यः प्रदर्श्यते ॥१८९॥

སྔ་མར་ དབྱེ་བ་ཙམ་ ཞིག་ བསྟན །
འདིར་ནི་ ལྷག་པ་ ཉིད་ བསྟན་དོ །
སླར་ཡང་ མཚུངས་པའི་ ལྡོག་པ་ཅན །
གཞན་དག་ རབ་ཏུ་བསྟན་པར་བྱ ॥ ༡༨༩

त्वन्मुखम्पुण्डरीकञ्च फुल्ले सुरभिगन्धिनी ।
भ्रमद्भ्रमरमम्भोजं लोलदृष्टि मुखन्तु ते ॥१९०॥

ཁྱོད་ཀྱི་ གདོང་ དང་ པདྨ་ དཀར །
རྒྱས་ ཤིང་ དྲི་བཟང་ལྡན་པ་སྟེ །
པདྨ་ལ་ནི་ བུང་བ་ འཁོར །
ཁྱོད་ཀྱི་ གདོང་ ལ་ མིག་རབ་གཡོ ॥ ༡༩༠

चन्द्रोयमम्बरोत्तंसो हंसोयन्तोयभूषणं ।
नभो नक्षत्रमालीदमिदमुत्कुमुदम्पयः ॥१९१॥

ཟླ་བ་ འདི་ནི་ མཁའ་ཡི་ རྒྱན །
ངང་པ་ འདི་ནི་ ཆུ་ཡི་ རྒྱན །
མཁའ་ འདི་ རྒྱུ་སྐར་ ཕྲེང་བ་ཅན །
ཆུ་འདི་ ཀུ་མུ་ད་རྒྱས་པ་ཅན ॥ ༡༩༡

प्रतीयमानशैक्ल्याद्सिाम्ययोर्वियदम्भसोः ।
कृतः प्रतीतशुद्ध्योश्च भेदोस्मिंश्चन्द्रहंसयोः ॥१९२॥

འདིར་ ནི་ ཟླ་བ་ ངང་པ་ དག །
དཀར་བ་ཉིད་ སོགས་ རྟོགས་པ་ དང་ །
མཁའ་དང་ ཆུ་ ནི་དག་པར་ ཡང་ །
རྟོགས་པར་ མཚུངས་པའི་ དབྱེ་བ་ བྱས ༎ ༡༩༣

पूर्वत्र शब्दवत्साम्यमुभयत्रापि भेदकम् ।
भृङ्गनेत्रादि तुल्यन्तत्सादृश्यव्यतिरेकता ॥१९३॥

སྔ་མ་ལ་ ནི་ སྒྲ་ལྡན་ མཚུངས །
གཉིས་ག་ ལ་ ཡང་ ཐ་དད་ དབྱེ །
བུང་བ་ མིག་ལ་ སོགས་པ་ མཚུངས །
དེ་ཕྱིར་ མཚུངས་པའི་ ལྡོག་པ་ཅན ༎ ༡༩༣

•

अरत्नालोकसंहार्यमवार्यं सूर्यरश्मिभिः ।
दृष्टिरोधकरं यूनां यौवनप्रभवन्तमः ॥१९४॥

རིན་ཆེན་ སྣང་བས་མི་འཕྲོག་ ཅིང་ །
ཉི་མའི་འོད་ཀྱིས་ མི་ཟློག་པ །

ཡང་ཆོ་ ལས་ བྱུང་ ན་ ཆུང་གི །
སྨན་པས་ ལྟ་བ་འགོག་པར་བྱེད ॥ ༡༩༤

सजातिव्यतिरेकोयन्तमोजातेरिदन्तमः ।
दृष्टिरोधितया तुल्यं भिन्नमन्यैरदर्शयत् ॥१९५॥

སྨན་པའི་རིགས་ལས་ མུན་པ་ འདི །
ལྟ་བ་འགོག་པ་ ཉིད་ ཀྱིས་ མཚུངས །
གཞན་དག་གིས་ ནི་ ཐ་དད་ བསྟན །
འདི་ནི་ རིགས་མཐུན་ལྡོག་པ་ཅན ॥ ༡༩༥

प्रसिद्धहेतुव्यावृत्त्या यत्किञ्चित्कारणान्त[24a]रं ।
यत्र स्वाभाविकत्वं वा *विभाव्यं सा विभावना ॥१९६॥

རབ་ཏུ་གྲགས་པའི་ རྒྱུ་བཟློག་ནས །
གང་ཞིག་ རྒྱུ་ གཞན་ ཅུང་ཟད་དམ །
གང་དུ་ རང་གི་ ངོ་བོ་ ཉིད །
སྟོན་པ་ དེ་ནི་ སྒྲིད་པ་ཅན ॥ ༡༩༦

अपीतक्षीवकादम्बमसंमृष्टामलाम्बरं ।
अप्रसादितसूक्ष्माम्बु जगदासीन्मनोहरम् ॥१९७॥

མ་འཕྱངས་ སྨྱོས་པའི་ ཀ་དམྦ། །
མ་ཕྱིས་དྲི་མ་མེད་པའི་ མཁའ། །
གྲུངས་པར་ མ་བྲུས་ དྭངས་པའི་ཆུ། །
འགྲོ་བའི་ ཡིད་ནི་ འཕྲོག་པར་བྱེད ‖ ༡༩༨

अनञ्जितासिता दृष्टिर्भ्रूरनावर्जिता नता ।
अरञ्जितारुणश्चायमधरस्तव सुन्दरि ॥१९८॥

སྨན་མ་བསྐུས་པར་ དཀར་མིན་ མིག །
མནན་པ་ མེད་པར་ སྨིན་མ་ དམའ། །
ཚོན་ མ་བསྐུས་པར དམར་བ་ ནི། །
མཛེས་མ་ ཁྱོད་ཀྱི་ མཆུ་ འདི་འོ ‖ ༡༩༩

यदपीतादिजन्यं स्यात् क्षीवत्वाद्यन्यहेतुकं ।
अहेतुकश्च तस्येह विवक्षेत्यविरुद्धता ॥१९९॥

གང་ཕྱིར་ མ་འཕྲུངས་ ལ་སོགས་ སྐྱེས །
སྨྲོས་པ་ཉིད་ སོགས་ རྒྱུ་གཞན་ཅན །
རྒྱུ་མེད་ དག་ཀྱང་ བརྗོད་ འདོད་པ །
དེ་ལ་ འདིར་ནི་ འགལ་བ་མེད ॥ ༡༩༩

वक्त्रं निसर्गसुरभि वपुरव्याजसुन्दरं ।
अकारणरिपुश्चन्द्रो निर्निमित्तसुहृत्स्मरः ॥२००॥

རང་བཞིན་ གྱིས་ནི་ ཁ་ དྲི་ཞིམ །
བཟོལ་མེད་པར་ཡང་ ལུས་པོ་ མཛེས །
རྒྱུ་མེད་ དག་ཏུ་ ཟླ་བ་ དགྲ །
རྒྱུ་མཚན་མེད་པར་ འདོད་པ་ གྲོགས ॥ ༢༠༠

निसर्गादिपदैरत्र हेतुः साक्षान्निवर्त्तितः ।
उक्तश्च सुरभित्यादिफलं तत्सा विभावना ॥२०१॥

རང་བཞིན་གྱི་སོགས་ ཚིག་གིས་ འདིར །
རྒྱུ་ནི་ དངོས་སུ་ རབ་བཟློག་ ཅིང་ །

དྲི་ཞིམ་ ཉིད་ སོགས་ འབྲས་བུ་ བརྗོད། །
དེ་ཕྱིར་ དེ་ནི་ སྲིད་པ་ཅན། ། ༢༠༡

वस्तु किञ्चिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः ।
उक्तिसंक्षिप्तरूपत्वात् सा समासोक्तिरिष्यते ॥२०२॥

དངོས་པོ་ འགའ་ལ་ བསམས་བྱས་ནས། །
དེ་དང་ མཚུངས་པའི་དངོས་པོ་གཞན། །
བསྡུས་པའི་ཚུལ་གྱིས་ བརྗོད་བྱེད་པ། །
དེ་ནི་ བསྡུས་པ་ བརྗོད་པར་ འདོད། ། ༢༠༢

[24b]**पिबन्मधु यथाकामं भ्रमरः फुल्लपङ्कजे ।**
अप्यसन्नद्धसौरभ्यं पश्य चुम्बति कुड्मलं ॥२०३॥

བུང་བ་ ཇི་ལྟར་འདོད་པ་བཞིན། །
པདྨ་ རྒྱས་ལ་ སྦྲང་རྩི་ འཐུངས། །
དྲི་ཞིམ་ རྒྱས་པ་མ་ཡིན་ ཡང་ །
མེ་ཏོག་ཁ་མ་བྱེ་ སྦྱོར་ ལྟོས། ། ༢༠༣

इति प्रौढाङ्गनाबद्धरतिलीलस्य रागिणः ।
कस्याञ्चिदिह बालायामिच्छा*वृत्तिर्विभाव्यते ॥२०४॥

ཆགས་ལྡན་ བུད་མེད་ དར་མ་ལ །
དགའ་བའི་ རྩེ་དགས་ བཅིངས་པ་ དག །
བུ་མོ་ འགའ་ཞིག་ དག་ལ་ ཡང་ །
འདོད་པ་ འཕེལ་བ་ སྟོན་པར་བྱེད ॥ ༢༠༤

विशेष्यमात्रभिन्नापि तुल्याकारविशेषणा ।
अस्त्यसावपराप्यस्ति भिन्नाभिन्नविशेषणा ॥२०५॥

ཁྱད་པར་ཅན་ ཙམ་ ཐ་དད་ ཅིང་ །
ཁྱད་པར་ རྣམ་པ་ མཚུངས་པའང་ ཡོད །
ཁྱད་པར་ ཐ་དད་ ཐ་དད་ མིན །
འདི་ནི་ གཞན་པ་ དག་ ཀྱང་ ཡོད ॥ ༢༠༥

रूढमूलः फलभरैः पुष्णन्ननिशमर्थिनः ।
सान्द्रच्छायो महावृक्षः सायमासादितो मया ॥२०६॥

རྩ་བརྟན་ འབྲས་བུའི་ ཁུར་གྱིས་ ནི །
སྦྱོང་རྣམས་ རྟག་ཏུ་ ཁྲུས་པར་བྱེད །
གྲིབ་མ་ སྨུམ་པའི་ ལྡོན་པ་ཆེ །
འདི་ནི་ བདག་གིས་ ཡང་དག་ ཐོབ ॥ ༢༠༦

अनल्पविटपाभोगः फलपुष्पसमृद्धिमान् ।
सच्छायः स्थैर्यवान्दैवादेष लब्धो मया द्रुमः ॥२०७॥

ཡལ་གའི་ ཁྱོན་ནི་ མི་ཆུང་ཞིང་ །
མེ་ཏོག་ འབྲས་བུ་ ཕུན་སུམ་ཚོགས །
དམ་པའི་ གྲིབ་བསིལ་ བརྟན་ལྡན་པའི །
ཤིང་འདི་ བདག་གིས་ སྐལ་བས་ རྙེད ॥ ༢༠༧

उभयत्र पुमान्कश्चिद्वृक्षत्वेनोपवर्णितः ।
सर्वे साधारणा धर्माः पूर्वत्रान्यत्र तु द्वयं ॥२०८॥

གཉི་ག་ ལ་ ཡང་ སྐྱེས་བུ་འགའ །
ལྗོན་པ་ཉིད་ ཀྱིས་ ཉེ་བར་བསྟགས །

ཆོས་རྣམས་ ཐམས་ཅད་ སྔ་མ་ལ།
ཐུན་མོང་ གཞན་ལ་ རྣམ་པ་ གཉིས ॥ ༢༠༨

निवृत्तव्यालसंसर्गो निसर्गमधुराशयः ।
अयमम्भोनिधिः कष्टङ्कालेन परिशोष्यते ॥२०९॥

སྦྲུལ་ངན་ འགྲོགས་པ་ དང་ བྲལ་ཞིང་།
རང་བཞིན་གྱིས་ ནི་ མངར་བའི་གཞི།
ཀྱེ་མ་ རྒྱ་ ཡི་ གཏེར་ འདི་ ནི།
དུས་ཀྱིས་ ཡོངས་སུ་བསྐམ་པར་འགྱུར ॥ ༢༠༩

इत्यपूर्व्वसमासोक्तिः[25a] **पूर्व्वधर्मनिवर्त्तनात् ।**
समुद्रे तत्समानस्य पुंसो व्यावृत्तिसूचने ॥२१०॥

རྒྱ་མཚོ་ ལ་ ནི་ དེ་ མཚུངས་པ།
སྐྱེས་བུའི་ ལྡོག་པ་ གསལ་བྱེད་ཅིང་།
སྔ་མའི་ཆོས་ ནི་ བཟློག་པའི་ ཕྱིར།
འདི་ནི་ སྔོན་མེད་ བསྡུས་པར་ བརྗོད ॥ ༢༡༠

विवक्षा या विशेषस्य लोकसीमातिवर्त्तिनी ।
असावतिशयोक्तिः स्यादलंकारोत्तमा यथा ॥२११॥

ཁྱད་པར་ གྱི་ ནི་ བརྗོད་ འདོད་ གང་ །
འཇིག་རྟེན་ མཚམས་ ལས་ རྒལ་གྱུར་པ །
ཡུལ་དུ་གྱུར་བར་ བརྗོད་པ་ འདི །
རྒྱན་གྱི་ དམ་པ་ ཡིན་ཏེ་ དཔེར ॥ ༢༢༢

मल्लिकामालभारिण्यः सर्व्वाङ्गीनार्द्रचन्दनाः ।
क्षोमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ॥२१२॥

མལླི་ཀཱ་ཡི་ ཕྲེང་ ཆོགས་ཅན །
ལུས་ ཀུན་ཁྱབ་པའི་ ཙནྡན་ གཤེར །
དཀར་བའི་ གོས་ཅན་ མངོན་འགྲོ་མ །
ཟླ་བའི་འོད་ལ་ མཚོན་མ་ཡིན ॥ ༢༢༣

चन्द्रातपस्य बाहुल्यमुक्तमुत्कर्षवत्तथा ।
संशयातिशयादीनां व्यक्त्य किञ्चिन्निदर्श्यते ॥२१३॥

ཟླ་བའི་ འོད་ནི་ ལྷག་པ་ ཉིད།
ཁྱད་འཕགས་ལྡན་ བརྗོད་ དེ་བཞིན་དུ།
ཕྲེ་ཆོམ་ ཕུལ་བྱུང་ ལ་སོགས་ ཀྱང་།
གསལ་ ཕྱིར་ ཅུང་ཟད་ བསྟན་པར་བྱ། ༢༡༣

स्तनयोर्जघनस्यापि मध्ये मध्यं प्रिये तव ।
अस्ति नास्तीति संदेहो न मेद्यापि निवर्त्तते ॥२१४॥

དགའ་མ་ ཁྱོད་ཀྱི་ ནུ་མ་ དང་།
དཔྱི་ཡི་ བར་ན་ སྐེད་པ་ ནི།
ཡོད་ དང་ མེད་ ཅེས་ བདག་གི་ ནི།
ཕྲེ་ཆོམ་ ད་དུང་ ཟློག་མ་གྱུར། ༢༡༤

निर्णेतुं मध्यमस्तीति शक्यन्तव नितम्बिनि ।
अन्यथानुपपत्त्यैव पयोधरभरस्थितेः ॥२१५॥

ནི་དཔྱི་ནི་ ཁྱོད་ ལ་ ནི།
སྐེད་པ་ ཡོད་ ཅེས་ ངེས་པར་ནུས།

འོ་མ་འཛིན་པའི་ཁྱུར་ གནས་པ །
རྣམ་པ་ གཞན་དུ་ སྲིད་མ་ཡིན ॥ ༢༡༥

अहो विशालम्भूपालभुवनत्रितयोदरं ।
माति मातुमशक्योपि यशोराशिर्यदत्र ते ॥२१६॥

ཁྱོད་ཀྱི་ གྲགས་པའི་ ཕུང་པོ་ ནི །
དཔག་ ནས་ མིན་ ཡང་ འདིར་ ཤོང་བ །
ས་སྟེང་ སྲིད་པ་ གསུམ་ གྱི་ ནི །
ཁོངས་ དག་ ཨེ་མ་ ཤིན་དུ་ ཡངས ॥ ༢༡༦

अलंकारान्तराणा[25b]मप्याहुरेकं परायणं ।
वागीशमहितामुक्तिमिमामतिशयाह्वयाम् ॥२१७॥

ངག་གི་དབང་པོས་ མཆོད་གྱུར་པ །
ཕུལ་བྱུང་ ཞེས་བྱ་ བརྗོད་པ་ འདི །
རྒྱན་ནི་ གཞན་པ་ རྣམས་ ཀྱི་ ཡང་ །
གཅིག་པུ་ དཔུང་གཉེན་ ཉིད་དུ་ བརྗོད ॥ ༢༡༧

अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा ।
अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षां विदुर्यथा ॥२१८॥

སེམས་ལྡན་ དག་གམ་ ཅིག་ཤོས་ ཀྱིས །
རྣམ་པ་ གཞན་དུ་ གནས་པའི་ ཚུལ །
གང་དུ་ རྣམ་གཞན་ རབ་རྟོག་པ །
དེ་ནི་ རབ་རྟོག་དུ་ རིག་ དཔེར ॥ ༢༡༨

मध्यन्दिनार्कसन्तप्तः सरसीं गाहते गजः ।
मन्ये मार्त्तण्डगृह्याणि पद्मान्युद्धर्तुमुत्सुकः ॥२१९॥

ཉིན་གུང་ ཉི་མས་ གདུངས་པ་ཡི །
གླང་པོ་ དག་ནི་ མཚོར་ འཇུག་པ །
ཉི་མའི་ ཕྱོགས་གྱུར་ པདྨ་ རྣམས །
གཞོམ་པར་ འདོད་པ་ ཡིན་ནམ་ སྙམ ॥ ༢༡༩

स्नातुं पातुं बिसान्यत्तुं करिणो जलगाहनम् ।
तद्वैरनिष्क्रयायेति कविनोत्प्रेक्ष्य वर्ण्यते ॥२२०॥

ཁྲུས་དང་ བདུང་དང་ པད་ཙ་ དག །
བཟའ་ ཕྱིར་ ལག་ལྡན་ ཚུར་འཛུག་པ །
དེ་ནི་ ཁོན་ཡན་ ཟླན་ ཕྱིར་ཞེས །
སྙན་ངག་མཁན་ གྱིས་ རབ་བརྟགས་ བརྗོད ॥ ༢༢༠

कर्णस्य भूषणमिदं मदायतिनिरोधिनः ।
इति कर्णोत्पलं प्रायस्तव दृष्ट्या विलङ्घ्यते ॥२२१॥

འདི་ནི་ བདག་གི་རིང་བ་དག །
འགོག་བྱེད་ རྣ་བའི་རྒྱན་ ཞེས་ དེ །
ཁྱོད་ཀྱི་ མིག་གིས་ རྣ་བ་ཡི །
ཨུཏྤལ་ དག་ལ་ འགོངས་པ་ འདྲ ॥ ༢༢༡

अपाङ्गभागपातिन्या दृष्टेरंशुभिरुत्पलं ।
स्पृश्यते वा नचैवन्तु कविनोत्प्रेक्ष्य कथ्यते ॥२२२॥

མིག་ཟུར་ ཆར་ ནི་ ལྷུང་གྱུར་པ །
མིག་གི་འོད་ཀྱིས་ ཨུཏྤལ་ལ །

རིག་གམ་ མིན་ ཡང་ སྐྱིན་ངག་མཁན། །
དེ་ལྟར་ རབ་ཏུ་བརྟགས་ཏེ་ བརྗོད། ༢༢༢

लिम्पतीव तमोऽङ्गानि वर्षतीवांजनं नभः ।
इतीदमपि भूयिष्ठमुत्प्रेक्षालक्षणान्वितं ॥२२३॥

མུན་པ་ ལུས་ ལ་ འབྱུག་པ་ བཞིན། །
མཁའ་ནི་ མིག་སྨན་ ཆར་འབེབས་ བཞིན། །
ཞེས་འདི་ ཡང་ ངོ་ རབ་རྟོག་གི །
མཚན་ཉིད་ལྡན་པ་ ཤིན་ཏུ་ མང་ ༢༢༣

केषांचिदुपमाभ्रान्ति[26a]रिवश्रुत्येह जन्यते ।
नोपमानं तिङन्तेनेत्यतिक्रम्याप्तभाषितं ॥२२४॥

འདིར་ནི་ བཞིན་གྱི་སྒྲ་ཡིས་ འགའ། །
ཉིང་ ཡི་ མཐའ་ ཡིས་ དཔེ་ མ་ ཡིན། །
ཞེས་པ་ ཡིད་ཆེས་ གསུངས་ འདས་ནས། །
དཔེ་ཉིད་དུ་ ནི་ འཁྲུལ་པ་ སྐྱེ ༢༢༤

उपमानोपमेयत्वं तुल्यधर्मव्यपेक्षया ।
लिम्पतेस्तमसश्चासौ धर्मः को नु समीक्ष्यते ॥२२५॥

དཔེ་ དང་ དཔེར་བྱ་ཉིད་ དག་ནི །
མཚུངས་པའི་ཆོས་ ལ་ ལྟོས་པས་ ན །
འབྱུག་པ་ དང་ ནི་ མུན་པ་ ལ །
ཆོས་ འདི་ མཐོང་བར་གྱུར་ དམ་ ཅི ॥ ༢༢༥

यदि लेपनमेवेष्टं लिम्पतिर्नाम कोपरः ।
स एव धर्मो धर्मी चेत्यनुन्मत्तो न भाषते ॥२२६॥

གལ་ཏེ་ འབྱུག་པ་ཉིད་ འདོད་ན །
འབྱུག་ ཅེས་བྱ་བ་ གཞན་པ་ ཅི །
དེ་ཉིད་ ཆོས་ དང་ ཆོས་ཅན་ ཡང་ །
ཞེས་པ་ མ་སྨྱོས་ འཆད་ མ་ ཡིན ॥ ༢༢༦

कर्त्ता यद्युपमानं स्यान्न्यग्भूतोसौ क्रियापदे ।
स्वक्रियासाधनव्यग्रे नालमन्यद्व्यपेक्षितुं ॥२२७॥

གལ་ཏེ་ བྱེད་པ་ དཔེ་ ཡིན་ ན།
བྱ་ཚིག་ ལ་ འདི་ དབང་བྲལ་ འགྱུར།
རང་གི་ བྱ་ སྒྲུབ་ མི་ནུས་པ།
གཞན་གྱི་ ལྟོས་བྱར་ མི་འགྱུར་རོ॥ ༢༢༧

यो लिम्पत्यमुना तुल्यं तम इत्यपि शंसतः।
अङ्गानीति न सम्बद्धं सोपि मृग्यः समो गुणः ॥२२८॥

གང་གིས་ འབྱུག་པ་ འདི་ དང་ ནི།
མུན་པ་ མཚུངས་ ཞེས་ སྨྲ་ ན་ ཡང་།
ལུས་ལ་ ཞེས་པ་ མ་འབྲེལ་ ཏེ།
དེ་ ཡང་ ཡོན་ཏན་ མཚུངས་པ་ བརྟག ॥ ༢༢༨

यथेन्दुरिव ते वक्त्रमिति कान्तिः प्रतीयते।
न तथा लिम्पतौ लेपादन्यदत्र प्रतीयते ॥२२९॥

དཔེར་ན་ ཁྱོད་ གདོང་ ཟླ་བ་ བཞིན།
ཅེས་པས་ མཛེས་པ་ རྟོགས་འགྱུར་ ཏེ།

དེ་བཞིན་ འཁྲུག་པ་ འདི་ ལ་ ནི །
འཁྲུག་པ་ ལས་ གཞན་ རྟོགས་ མ་ཡིན ‖ ༢༢༩

तदुपश्लेषणार्थोयं लिम्पतिर्ध्वान्तकर्तृकः ।
अङ्गकर्मा च पुंसैवमुत्प्रेक्षित इतीष्यते ॥२३०॥

དེ་ཕྱིར་ འཁྲུག་པ་ འདི་ དང་ ནི །
སྣུན་པ་ བྱེད་པ་ ལུས་ ཀྱང་ ལས །
ཉེ་བར་སྦྱར་དོན་ སྐྱེས་བུ་ ཡིས །
དེ་ལྟར་ རབ་བརྟགས་ ཞེས་ འདོད་བྱ ‖ ༢༣༠

मन्ये श[26b]ङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोपि तादृशः ॥२३१॥

སྙམ་ དང་ དོགས་ དང་ ངེས་ དང་ འདྲ །
མིན་ནམ་ ཞེས་པ་ ལ་སོགས་པའི །
སྒྲ་ ཡིས་ རབ་བརྟགས་ གསལ་བར་བྱེད །
བཞིན་ གྱི་ སྒྲ་ ཡང་ དེ་དང་འདྲ ‖ ༢༣༡

हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणं ।
कारकज्ञापकौ हेतू तौ च नैकविधौ यथा ।।२३२

རྒྱུ་ དང་ ཕྲ་མོ་ ཆ་ དག་ ནི །
ཚིག་ རྣམས་ དག་གི་ རྒྱན་ གྱི་ མཆོག །
རྒྱུ་ ནི་ བྱེད་པོ་ ཤེས་བྱེད་དེ །
དེ་དག་ རྣམ་པ་ དུ་མ་ དཔེར ༎ ༢༣༢

अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः ।
उत्पादयति सर्वस्य प्रीतिं मलयमारुतः ।।२३३।।

མ་ལ་ཡ་ ཡི་ རླུང་ གིས་ ནི །
ཙནྡ་ ལྗོན་པ་ གསར་བ་ ཡི །
ཡལ་འདབ་ སྒྲོད་པར་བྱེད་པ་ འདི །
ཀུན་ གྱི་ དགའ་བ་ སྐྱེད་པར་བྱེད ༎ ༢༣༣

प्रीत्युत्पादनयोगस्य रूपस्यात्रोपबृंहणं ।
अलंकारतयोद्दिष्टं निवृत्तावपि तत्समं ।।२३४।।

དགའ་བ་ སྐྱེད་པར་ འོས་པ་ ཡི །
རང་བཞིན་ ཉེ་བར་སྦྱར་བ་ འདི །
རྒྱུན་ ཉིད་ ཀྱིས་ ནི་ རབ་བསྟན་ཏེ །
རྟོག་པ་ དག་ ཀྱང དེ་དང་མཚུངས ॥ ༢༢༤

चन्दनारण्यमाधूय स्पृष्ट्वा मलयनिर्झरान् ।
पथिकानामभावाय पवनोयमुपस्थितः ॥२३५॥

མ་ལ་ཡ་ ཡི་ ཆུ་རྒྱུན་ ལ །
རེག་ ཅིང་ ཙནྡན་ ནགས་ བསྐྱོད་ནས །
རླུང་ འདི་ འགྲོན་པོ་ རྣམས་ དག་ ནི །
ཉམས་པར་བྱ་ཕྱིར་ ཉེ་བར་གནས ॥ ༢༢༥

अभावसाधनायालमेवम्भूतो हि मारुतः ।
विरहज्वरसंभूतमनोज्ञारोचके जने ॥२३६॥

དེ་ལྟར་ བྱུང་བའི་ རླུང་ གིས་ ནི །
འབྲལ་བའི་ རིམས་ ལས་ བྱུང་གྱུར་པ །

སྐྱེ་བོ་ ཡིད་འོང་ ལ་ སྲིད་པ །
ཉམས་པ་ སྒྲུབ་པ་བྱེད་པར་ནུས ॥ ༢༣༦

निर्वर्त्ये च विकाय च हेतुत्वन्तदपेक्षया ।
प्राप्ये तु कर्मणि प्रायः क्रियापेक्षैव हेतुता ॥२३७॥

འགྲུབ་པར་བྱ་ དང་ རྣམ་འགྱུར་ ལ །
དེ་ཉིད་ ལ་ ལྟོས་ རྒྱུ་ཉིད་དེ །
འཐོབ་པའི་ ལས་ ལ་ ཕལ་ཆེར་ ནི །
བྱ་བ་ ལ་ ལྟོས་ རྒྱུ་ཉིད་དོ ॥ ༢༣༧

हेतुर्निर्वर्त्तनीयस्य दर्शितः शेषयोर्द्वयोः ।
दत्त्वो[27a]दाहरणद्वन्द्वं ज्ञापको वर्णयिष्यते ॥२३८॥

འགྲུབ་པར་བྱེད་པའི་ རྒྱུ་ དག་ ནི །
བསྟན་ཏེ་ ལྷག་མ་ གཉིས་པོ་ ཡི །
དཔེར་ བརྗོད་ གཉིས་ ནི་ བཀོད་བྱས་ནས །
ཤེས་པར་བྱེད་པ་ བསྟན་པར་བྱ ॥ ༢༣༨

उत्प्रबालान्यरण्यानि वाप्यः संफुल्लपङ्कजाः ।
चन्द्रः पूर्णश्च कामेन पान्थदृष्टिविषङ्कृतं ॥२३९॥

ལོ་འདབ་ གསར་འབྲུངས་ ནགས་ཚལ་ དང་ །
འདབ་བརྒྱ་ རབ་ཏུ་རྒྱས་པའི་ རྫིང་ །
ཟླ་བ་ རྒྱས་པ་ འདོད་པ་ ཡིས །
འགྲོན་པོ་ ལྟ་བའི་ དུག་ཏུ་ བྱས ‖ ༢༣༩

मानयोग्यां करोमीति प्रियस्थाने कृतां सखीम् ।
बाला भ्रूभङ्गजिह्माक्षी पश्यति स्फुरिताधरं ॥२४०॥

ཁེངས་པ་ གོམས་པར་བྱའོ་ ཞེས །
གྲོགས་མོ་ མཛའ་བོའི་ གནས་བཀོད་ལ །
བུ་མོ་ སྨིན་འཁྲུག་ མིག་ཡོན་ གྱིས །
མཆུ་ ནི་ གཡོ་ ཞིང་ ལྟ་བར་བྱེད ‖ ༢༤༠

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः ।
इतीदमपि साध्वेव कालावस्थानिवेदने ॥२४१॥

ཉི་མ་ ནུབ་གྱུར་ ཟླ་བ་ མཛེས །
འདབ་ཆགས་ རྣམས་ ནི་ གནས་སུ་ སོང་ །
ཞེས་པ་ འདི་ ཡང་ དུས་ ཀྱི་ སྐབས །
གོ་བར་བྱེད་པ་ ལེགས་པ་ ཉིད ॥ ༢༤༡

*अबन्ध्यैरिन्दुपादानामसाध्यैश्चन्दनांभसाम् ।
देहोष्मभिः सुबोधं ते सखि कामातुरं मनः ॥२४२॥

གྲོགས་མོ་ འདོད་པས་ གཟིར་བའི་ ཡིད །
ཟླ་བའི་ ཟེར་ གྱིས་ མི་ཟློག་ ཅིང་ །
ཙནྡན་ ཆུ་ ཡིས་ མི་བཟོད་པ །
ལུས་ ཀྱི་ དྲོད་ ཀྱིས་ ལེགས་པར་རྟོགས ॥ ༢༤༢

इति लक्ष्याः प्रयोगेषु रम्या ज्ञापकहेतवः ।
अभावहेतवः केचिद्व्याक्रियन्ते मनोहराः ॥२४३॥

ཞེས་པའི་ སྦྱོར་བ་ རྣམས་ ལ་ ནི །
ཡིད་འོང་ ཤེས་བྱེད་ རྒྱུ་ དག་ མཚོན །

དངོས་མེད་ རྒྱུ་ ནི་ ཡིད་ འཕྲོག་པ །
འགའ་ཞིག་ རབ་ཏུ་བསྟན་པར་བྱ ॥ ༢༤༣

अनभ्यासेन विद्यानामसंसर्गेण धीमतां ।
अनिग्रहेण चाक्षाणां जाय[27b]ते व्यसनं नृणां ॥२४४॥

རིག་པ་ རྣམས་ ནི་ མ་གོམས་ དང་ །
བློ་ལྡན་ རྣམས་ དང་ མ་འགྲོགས་ དང་ །
དབང་པོ་ རྣམས་ ནི་ མ་བསྡམས་པས །
མི་ རྣམས་ རབ་ཏུ་གདུང་བར་ གྱུར ॥ ༢༤༤

गतः कामकथोन्मादो गलितो यौवनज्वरः ।
क्षतो मोहश्च्युता तृष्णा कृतं पुण्याश्रये मनः ॥२४५॥

འདོད་པའི་ གཏམ་ གྱིས་ སྨྱོས་པ་ སོང་ །
ལང་ཚོ་ཡི་ ནི་ རིམས་ དག་ ཉམས །
རྨོངས་པ་ ཟད་ ཅིང་ སྲེད་པ་ འཕོས །
བསོད་ནམས་གནས་ ལ་ ཡིད་ དག་ བྱས ॥ ༢༤༥

वनान्यमूनि न गृहाण्येता नद्यो न योषितः ।
मृगा इमे न दायादास्तन्मे नन्दति मानसं ॥२४६॥

ནགས་ཚལ་ འདི་དག་ ཁྱིམ་ མ་ཡིན། །
ཆུ་ཀླུང་ འདི་དག་ བུད་མེད་ མིན། །
རི་དྭགས་ འདི་དག་ བུ་ཚ་ མིན། །
དེ་ཕྱིར་ བདག་ གི་ ཡིད་དགའ་འོ། ॥ ༢༤༦

अत्यन्तमसदार्याणामनालोचितचेष्टितं ।
अतस्तेषां विवर्धन्ते सततं सर्वसंपदः ॥२४७॥

ཤིན་ཏུ་ མ་བརྟགས་ སྤྱོད་པ་ ནི། །
འཕགས་པ་ རྣམས་ ལ་ ཡོད་ མ་ཡིན། །
དེ་ཕྱིར་ དེ་དག་ རྣམས་ ཀྱི་ ནི། །
ཕུན་ཚོགས་ ཐམས་ཅད་ རྟག་ཏུ་ འཕེལ། ॥ ༢༤༧

उद्यानसहकाराणामनुद्भिन्ना न मञ्जरी ।
देयः पथिकनारीणां सतिलः सलिलाञ्जलिः ॥२४८॥

སྐྱེད་ཚལ་ ས་ཧ་ཀཱ་ར་ རྣམས།
སྐྱེ་མ་ མ་འཁྲུངས་པ་ མིན་ ན།
འགྲོན་པོ་ རྣམས་ ཀྱི་ བུད་མེད་ ནི།
དེ་ལ་བཅས་ཁྲོར་ཆུ་ སྲིན་བུར་འགྱུར ॥ ༢༤༨

प्रागभावादिरूपस्य हेतुत्वमिह वस्तुनः।
भावामावस्वरूपस्य कार्यस्योत्पादनम्प्रति ॥२४९॥

ཡོད་ དང་ མེད་པའི་ རང་བཞིན་ གྱི།
འབྲས་བུ་ སྐྱེད་པ་ དག་ ལ་ འདིར།
སྔོན་མེད་ ལ་སོགས་ རང་བཞིན་ གྱི།
དངོས་པོ་ ཡི་ ནི་ རྒྱུ་ ཉིད་དོ ॥ ༢༤༩

दूरकार्यस्तत्सहजः कार्यानन्तरजस्तथा।
अयुक्तयुक्तकारी चेत्यसंख्याश्चित्रहेतवः ॥२५०॥

རིང་འབྲས་ དེ་དང་ལྷན་ཅིག་སྐྱེས།
དེ་བཞིན་ འབྲས་ མ་ཐག་ སྐྱེས་དང་།

རིགས་ མིན་ རིགས་པ་བྱེད་ ཅེས་པ །
མཚར་བའི་ རྒྱུ་ རྣམས་ གྲངས་མེད་དོ ॥ ༢༥༠

तेमी प्रयोगमार्गेषु गौण[28a]वृत्तिव्यपाश्रयाः ।
अत्यन्तसुन्दरा दृष्टास्तदुदाहृतयो यथा ॥२५१॥

འདི་ དག་ སྦྱོར་བའི་ ལམ་ རྣམས་ ལ །
ཕལ་པའི་ འཇུག་པ་ ལ་ བརྟེན་པ །
ཤིན་ཏུ་ མཛེས་པ་ དག་ མཐོང་སྟེ །
དེ་ཡི་ དཔེར་བརྗོད་ ཇི་ལྟར་ན ॥ ༢༥༡

त्वदपाङ्गाह्वयं जैत्रमङ्गजास्त्रं यदंगने ।
मुक्तन्तदन्यतस्तेन सोप्यहं मनसि क्षतः ॥२५२॥

ལུས་ཅན་ ཁྱོད་ མིག་ཟུར་ ཅེས་པ །
རྒྱལ་བྱེད་ ལུས་སྐྱེས་ དག་ གི་ མཚོན །
གང་ དེ་ གཞན་ ལ་ རབ་འཕངས་པ །
དེ་ ཡིས་ བདག་ གི་ ཡིད་ཀྱང་ བཅོམ ॥ ༢༥༢

आविर्भवति नारीणां वयः पर्यस्तशैशवं ।
सहैव विविधैः पुंसामङ्गजोन्मादविभ्रमैः ॥२५३॥

སྐྱེས་བུ་ ལུས་སྐྱེས་ ཀྱིས་ སྨྱོས་པའི །
རྣམ་འཕྲུལ་ སྣ་ཚོགས་ ལྷན་ཅིག་ ཉིད །
བུད་མེད་ རྣམས་ ལ་ བུ་མོ་ ནི །
ཡོངས་སུ་ནུབ་པའི་ ན་ཚོད་ སྐྱེས ॥ ༢༥༣

पश्चात्पर्यस्य किरणानुदीर्णश्चन्द्रमण्डलं ।
प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः ॥२५४॥

ཤར་ཉིད་ རི་དྭགས་ མིག་ཅན་ གྱི །
ཆགས་པའི་ རྒྱ་མཚོ་ རྒྱས་པར་གྱུར །
ཕྱིས་ནས་ འོད་ཟེར་ རབ་འཕྲོས་པས །
ཟླ་བ་ ཡི་ ནི་ དཀྱིལ་འཁོར་ ཤར ॥ ༢༥༤

राज्ञां हस्तारविन्दानि कुड्मलीकुरुते कुतः ।
देव त्वच्चरणद्वन्द्वरागबालातपः स्पृशन् ॥२५५॥

ལྷ་ཅིག་ ཁྱོད་ཀྱི་ ཞབས་ གཉིས་པོ །
དམར་བ་ ཉི་ གཞོན་ ལ་ རིག་པས །
རྒྱལ་པོ་ རྣམས་ ཀྱི་ ལག་པ་ ཡི །
པདྨ་ ཟུམ་པར་བྱེད་པ་ ཅི ॥ ༢༥༥

पाणिपद्मानि भूपानां संकोचयितुमीशते ।
त्वत्पादनखचन्द्राणामर्च्चिषः कुन्दनिर्मलाः ॥२५६॥

ཁྱོད་ ཀྱི་ ཞབས་ སེན་ཟླ་བ་ ཡི །
འོད་ཟེར་ ཀུན་ད་ དྲི་མེད་ རྣམས །
ས་སྐྱོང་རྣམས་ཀྱི་ ལག་པ་ ཡི །
པདྨ་ ཟུམ་པར་བྱེད་ ལ་ དབང་ ॥ ༢༥༦

इति हेतुविकल्पस्य दर्शिता गतिरीदृशी ।
इङ्गिताकारलक्ष्योर्थः सौक्ष्म्यात्सूक्ष्म इति स्मृतः ॥२५७॥

ཞེས་པ་ རྒྱུ་ ཡི་ རྣམ་རྟོག་ གི །
ལུགས་ ནི་ འདི་འདྲ་ དག་ཏུ་ བསྟན །

ཟུར་དང་ རྣམ་པས་ མཚོན་པའི་ དོན། །
སྦྲ་ ཕྱིར་ སྦྲ་མོ་ ཞེས་པར་ བཤད། ༎ ༢༥༧

कदा नौ[28b]सङ्गमो भावीत्याकीर्णे वक्तुमक्षमः ।
अवेत्य कान्तमबला लीलापद्मं न्यमीलयत् ॥२५८॥

ནམ་ ཞིག་ འུ་ཅག་ འགྲོགས་འགྱུར་ ཞེས། །
ཚོགས་སུ་ བརྗོད་པ་ མ་བཟོད་པའི། །
མཛའ་བོ་ རིག་ནས་ བུད་མེད་ ཀྱིས། །
རྩེ་ དགའི་ པདྨ་ ཟུམ་པར་བྱས། ༎ ༢༥༨

पद्मसंमीलनादत्र सूचितो निशि सङ्गमः ।
आश्वासयितुमिच्छन्त्या प्रियमंगजपीडितम् ॥२५६॥

ལུས་སྐྱེས་ དག་ གིས་ གཟིར་བ་ ཡི། །
མཛའ་བོ་ དབུགས་ དབྱུང་ འདོད་པ་ ཡིས། །
པདྨ་ ཟུམ་པར་བྱས་པ་ ལས། །
འདིར་ ནི་ མཚན་མོ་ འགྲོགས་པར་ བསྟན། ༎ ༢༥༩

त्वदर्पितदृशस्तस्या गीतगोष्ठ्यामवर्धत ।
उद्दामरागतरला च्छाया कापि मुखाम्बुजे ॥२६०॥

ཁྱོ་ཡི་མདུན་སར་ཁྱོད་ལ་མིག །
གཏད་པས་གདོང་གི་རྒྱ་སྐྱེས་དེར །
ཆགས་པ་འབར་ཞིང་རྒྱས་པ་ཡི །
མཛེས་པ་ཅི་ཡང་བྱུང་བར་གྱུར ॥ ༢༦༠

इत्यनुद्भिन्नरूपत्वाद्रत्युत्सवमनोरथः ।
अनुलङ्घ्यैव सूक्ष्मत्वमभूदत्राप्यवस्थितः ॥२६१॥

འདིར་ཡང་རང་བཞིན་མ་བརྗོད་པར །
དགའ་བའི་དགའ་སྟོན་འདོད་པ་དག །
ངེས་པར་གནས་པ་ཉིད་གྱུར་པ །
ཕྲ་མོ་ཉིད་ལས་རྒལ་མ་ཡིན ॥ ༢༦༡

लेशो लेशेन निर्भिन्नवस्तुरूपनिगूहनं ।
उदाहरण एवास्य रूपमाविर्भविष्यति ॥२६२॥

ཆ་ཉི་ཆ་ ཡིས་ དངོས་པོ་ ཡི །

རང་བཞིན་ ངེས་པར་གསལ་བ་སྒྲིབ །

དཔེར་བརྗོད་ཉིད་ ཀྱིས་ འདི་ ཡི་ ཉི །

རང་བཞིན་ ངེས་པར་གསལ་བར་བྱ ॥ ༢༦༢

राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः ।

अवगच्छेयुरा ज्ञातमहो शीतानिलं वनम् ॥२६३॥

རྒྱལ་པོའི་ བུ་མོ་ ལ་ ཆགས་ བདག །

སྤུ་ལོང་ རྒྱས་པ་ སྲུང་པ་པོས །

རིག་པར་གྱུར་ལ་ ཀྱེ་མ་ ཚལ །

བསིལ་བའི་རླུང་ལྡན་ ཡིན་པར་ ཤེས ॥ ༢༦༣

आनन्दाश्रु प्रवृत्तं मे कथं दृष्ट्वैव कन्यकाम् ।

अक्षि [29a] मे पुष्परजसा वातोद्धूतेन दूषितं ॥२६४॥

ཅི་ལྟར་ བུ་མོ་ མཐོང་ ཉིད་ ན །

བདག་ ལ་ དགའ་བའི་ མཆི་ མ་བྱུང་ །

སྲིང་ གིས་ གཙུབ་པའི་ མེ་ཏོག་ གི །
རྡུལ་ གྱིས་ བདག་ མིག་ སྦུན་སྦྱུང་ངོ་ ॥ ༢༧༤

इत्येवमादौ स्थानेऽयमलंकारोऽतिशोभते ।
लेश*मेकेचिदुन्निन्दां स्तुतिं वा लेशतः कृतां ॥ २६५ ॥

ཞེས་པ་ ལ་སོགས་ སྐབས་སུ་ ནི །
རྒྱན་འདི་ ཤིན་ཏུ་ མཛེས་པ་ ཡིན །
ཁ་ཅིག་ ཆ་ལས་ སྨད་པ་ འམ །
བསྟོད་པ་ བྱས་པ་ ཆ་ ཞེས་ བརྗོད ॥ ༢༧༥

युवैव गुणवान् राजा योग्यस्ते पतिरूर्जितः ।
रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि ॥ २६६ ॥

གང་ ཡིད་ གཡུལ་ གྱི་ དགའ་སྟོན་ལ །
འདོད་པའི་ དགའ་སྟོན་པས་ཀྱང་ ཆགས །
གཞི་ལྡན་ ལང་ཚོ་ ཡོན་ཏན་ཅན །
རྒྱལ་འདི་ ཁྱོད་ཀྱི་ བདག་པོར་འོས ॥ ༢༧༧

वीर्योत्कर्षस्तुतिर्निन्द्यैवास्मिन् भावनिवृत्तये ।
कन्यायाः कल्पते भोगान्निर्विविक्षोर्निरन्तरान् ॥

བརྩོན་འགྲུས་ཁྱད་འཕགས་བསྟོད་པ་འདིར །
སྨད་པ་ཉིད་དེ་ལོངས་སྤྱོད་ལ །
རྒྱུན་དུ་སྤྱོད་འདོད་བུ་མོ་ཡི །
བསམ་པ་དག་ནི་བཟློག་པར་ནུས ॥ ༢༦༧

चपलो निर्दयश्चासौ जनः किन्तेन मे सखि ।
आगःप्रमार्जनायैव चाटवो येन शिक्षिताः ॥ २६८

གནོད་པ་རབ་གཞིལ་ཉིད་ཀྱི་ཕྱིར །
གང་གིས་སྙན་པར་སྨྲ་བ་བསླབས །
སྐྱེ་བོ་འདི་ནི་བརྩེ་མེད་གཡོ །
གྲོགས་མོ་དེ་ཡིས་བདག་ལ་ཅི ॥ ༢༦༨

दोषाभासो गुणः कोपि दर्शितश्चाटुकारिता ।
मानं सखीजनोद्दिष्टं कर्तुं रागादशक्तया ॥ २६९ ॥

སྐྱེ་བོ་ གྲོགས་མོས་ རབ་བསྟན་ ཁིངས།
ཆགས་ ཕྱིར་ བྱེད་པ་ མ་ནུས་ནས།
སྐྱོན་ ལྟར་ སྣང་ཡང་ ཡོན་ཏན་ གང་།
སྙན་པར་ སྨྲ་བ་ ཉིད་ ཀྱང་ བསྟན། ༢༦༩

उद्दिष्टानां पदार्थानामनुद्देशो यथाक्रमं ।
यथासंख्यमिति प्रोक्तं संख्यानङ्क्रम इत्यपि ॥ २७०

དངོས་པོ་ རབ་ཏུ་བསྟན་པ་ རྣམས།
རིམ་པ་ བཞིན་དུ་ རྗེས་སྟོན་པ།
གྲངས་ དང་ རིམ་པ་ བཞིན་ ཅེས་པ།
གྲངས་ བཞིན་ ཅེས་པར་ རབ་ཏུ་བརྗོད། ༢༧༠

[29b]भ्रूवन्ते चोरिता तन्वि स्मितेक्षणमुखद्यु तिः ।
स्नातुमम्भःप्रविष्टायाः कुमुदोत्पलपङ्कजैः ॥ २७१ ॥

ཁྲུས་ལ་ ཆུར་ནི་ རབ་ཞུགས་མ།
ཁྱོད་ཀྱི་ འཛུམ་ མིག་གདོང་ མཛེས་ནི།

ཀུ་མུད་ ཨུཏྤལ་ པདྨ་ལས།
བཀུས་པར་ ངེས་སོ་ གཟུགས་ཅན་མ། ༢༧༡

प्रेयः प्रियतराख्यानं रसवत् रसपेशलं ।
ऊर्ज्जस्वि रूढाहंकारं युक्तोत्कर्षं च तत्त्रयं ॥ २७२ ॥

དགའ་བ་ མཆོག་ཏུ་ དགའ་བར་ བརྗོད།
ཉམས་ལྡན་ ཡིད་འོང་ ཉམས་དང་ལྡན།
གཟི་བརྗིད་ ང་རྒྱལ་ སྐྱེས་པ་སྟེ།
དེ་གསུམ་ ཁྱད་འཕགས་དག་དང་ལྡན། ༢༧༢

अद्य या मम गोविन्द जाता त्वयि गृहागते ।
कालेनैषा भवेत्प्रीतिस्तवैवागमनात्पुनः ॥ २७३ ॥

གོ་བིནྡ་ ཁྱོད་ ཁྱིམ་ འོངས་པ།
དེང་ བདག་ དགའ་བ་ སྐྱེས་པ་ གང་།
དགའ་བ་ འདི་ནི་ སླར་ཡང་ ཁྱོད།
དུས་ཀྱིས་ འོངས་ན་ འབྱུང་བར་ འགྱུར། ༢༧༣

इत्याह युक्तं विदुरो नान्यतस्तादृशी धृतिः ।
भक्तिमात्रसमाराध्यः सुप्रीतश्च ततो हरिः ॥ २७४ ॥

དེ་འདྲའི་ དགའ་བ་ བི་དུ་རས། །
གཞན་ ལས་ མིན་ཞེས་ རིགས་པར་ སྨྲས། །
དེ་ལ་ གུས་པ་ ཙམ་ གྱིས་ནི། །
རབ་བསྟེན་ འཕྲོག་བྱེད་ ཤིན་ཏུ་ དགེས། ॥ ༢༧༤

सोमः सूर्यो मरुद्भूमिर्व्योम होतानलो जलं ।
इति रूपाण्यतिक्रम्य त्वां द्रष्टुं देव के वयम् ॥ २७५ ॥

ཟླ་བ་ ཉི་མ་ རླུང་ ས་ མཁའ། །
སྦྱིན་སྲེག་བྱེད་ དང་ མེ་ དང་ ཆུ། །
ཞེས་པའི་ གཟུགས་ རྣམས་ རབ་འདས་ནས། །
ལྷ་ ཁྱོད་ ལྟ་བར་ ངེད་ཀྱིས་ ཅི། ॥ ༢༧༥

इति साक्षात्कृते देवे राज्ञो यद्राजवर्मणः ।
प्रीतिप्रकाशनं तच्च प्रेय इत्यनुगम्यतां ॥ २७६

མངོན་སུམ་ བྱས་པའི་ ལྷ་ལ་ནི །
རྒྱལ་པོ་ དགའ་བའི་གོ་ཆ་ ཡིས །
དགའ་བ་ རབ་ཏུ་གསལ་བྱས་ གང་ །
དེ་ ཡང་ དགའ་བར་ རྗེས་རྟོགས་བྱ ॥ ༢༧༦

मृतेति प्रेत्य संगंतुं यया मे मरणम्मतम् ।
सैवावन्ती मया[30a]लब्धा कथमत्रैव जन्मनि ॥१७७॥

ཤི་བ་ ཞེས་བྱ་ ཕ་རོལ་ཏུ །
གང་ དང་ འགྲོགས་ཕྱིར་ བདག་ འཆི་འདོད །
ཨ་བནྟི་དེ་ བདག་ གིས་ ནི །
སྐྱེ་ འདི་ཉིད་ལ་ ཇི་ལྟར་ ཐོབ ॥ ༢༧༧

प्राक्प्रीतिर्दर्शिता सेयं रतिः श्रृंगारतां गता ।
रूपबाहुल्ययोगेन तदिदं रसवद्वचः ॥२७८॥

དགའ་བ་ ཉིད་དུ་ སྔར་ བསྟན་ འདིར །
དགའ་བ་ སྒེག་པ་ ཉིད་ གྱུར་པའི །

རང་བཞིན་ རྒྱུས་དང་ལྡན་པས་ན །
འདི་ནི་ ཉམས་དང་ལྡན་པའི་ ཚིག ॥ ༢༧༨

निगृह्य केशेष्वाकृष्टा कृष्णा येनाग्रतो मम ।
सोयं दुःशासनः पापो लब्धः किं जीवति क्षणं ॥२७९॥

གང་གིས་ ནག་མོ་ བདག་ མདུན་ནས །
སྐྲ་ནས་ བཟུང་སྟེ་ དྲངས་གྱུར་པ །
བསྟན་དཀའ་ སྡིག་ཅན་ ཐོབ་པ་ འདི །
སྐད་ཅིག་ འཚོ་བར་ གྱུར་རམ་ ཅི ॥ ༢༧༩

इत्यारुह्य परां कोटीं क्रोधो रौद्रात्मतां गतः
भीमस्य पश्यतः शत्रुमित्येतद् रसवद्वचः ॥२८०॥

ཅེས་པ་ འཛེགས་ སྐྱེ་ དགྲ་དག་ལ །
ལྟ་བའི་ ཁྲོ་བ་ མཆོག་གི་ མཐར །
འཛོགས་པ་ དྲག་པོའི་བདག་ཉིད་ གྱུར །
འདི་ ནི་ རོ་དང་ལྡན་པའི་ ཚིག ॥ ༢༨༠

अजित्वा सार्णवामुर्वीमनिष्ट्वा विविधैर्मखैः ।
अदत्त्वा चार्थमर्थिभ्यो भवेयं पार्थिवः कथम् ॥२८१॥

མཚོར་ བཅས་ ས་ལ་ མ་རྒྱལ་ ཞིང་ །
རྣམ་མང་ མཆོད་ན་སྦྱི མ་བྱས་ལ །
སློང་ ལ་ ནོར་རྣམས་ མ་བྱིན་པར །
ས་སྐྱོང་དུ་ བདག་ ཇི་ལྟར་འགྱུར ༎ ༢༨༡

इत्युत्साहः प्रकृष्टात्मा तिष्ठन्वीररसात्मना ।
रसत्त्ववाङ्गिरामासां समर्थयितुमीश्वरः ॥२८२॥

ཅེས་པ་ སྤྲོ་བ་ ཁྱད་འཕགས་ བདག །
དཔའ་བོའི་ ཉམས་ཀྱི་ བདག་ཉིད་ གནས །
ཉམས་ལྡན་ ཉིད་དུ་ ནུས་པ་ ལ །
ཚིག་ འདི་དག་ནི་ དབང་བ་ ཡིན ༎ ༢༨༢

यस्याः कुसुमशय्यापि कोमलाङ्ग्या रुजाकरी ।
साधिशेते कथं देवी हुताशनवतीं चिताम् ॥ २८३ ॥

ལུས་འཇམ་ གང་ལ་ པདྨ་ཡི །
མལ་སྟན་ དག་ ཀྱང་ རྒྱབ་བྱེད་ས །
ལྷ་མོ་ དེ་ནི་ རོ་ཁང་ དག །
སྲིག་ཟ་ལྷན་པར་ ཇི་ལྟར་ ཉལ ॥ ༢༨༣

इति कारुण्यमुद्रिक्तमलं[30b]कारतया स्मृतम् ।
तथा परेपि बीभत्सहास्याद्भुतभयानकाः ॥ २८४ ॥

ཅེས་པ་ སྙིང་རྗེ་ རྒྱས་པ་ཡི །
རྒྱན་ཉིད་དུ་ནི་ རབ་ཏུ་བཤད །
དེ་བཞིན་ གཞན་ ཡང་ མི་སྐྱུག་ དང་ །
བཞད་གད་ རྨད་བྱུང་ འཇིགས་རུང་ངོ ॥ ༢༨༤

पायं पायं तवारीणां शोणितं करसंपुटैः ।
कौणपाः सह नृत्यन्ति कबन्धैरन्त्रभूषणाः ॥ १८५ ।

རྒྱུ་མས་ བརྒྱན་པའི་ སྲིན་པོ་ རྣམས །
མགོ་མེད་རོ་དང་ ལྷན་ཅིག་ཏུ །

ལག་པ་ སྦྲུར་བས་ ཁྱོད་ དགྲའི་ ཁྲག །
འཐུང་ཞིང་ འཐུང་ཞིང་ གར་བྱེད་དོ ༎ ༢༨༥

इदमम्लानमालाया लग्नं स्तनतटे तव ।
छाद्यतामुत्तरीयेण नवन्नखपदं सखि ॥ २८६ ॥

གྲོགས་མོ་ མེ་ཏོག་ མ་རྙིངས་མ །
ཁྱོད་ཀྱི་ ནུ་མའི་ ངོས་ལ་ནི །
སེན་རྗེས་ སར་པ་ ཆགས་པ་ འདི །
སྟོད་གཡོགས་ ཀྱིས་ ནི་ སྒྲིབ་པར་མཛོད ། ༢༨༦

अंशुकानि प्रवालानि पुष्पं हारादिभूषणं ।
शाखाश्च मन्दिराण्येषां चित्रं नन्दनशाखिनां ॥ २८७ ॥

དཔག་ཚལ་ ལྗོན་པ་ འདི་རྣམས་ ཀྱི །
འདབ་མ་ གསར་པ་ གོས་ བཟང་ དང་ །
མེ་ཏོག་ དོ་ཤལ་ ལ་ སོགས་ཅན །
ཡལ་འདབ་ ཁང་པར་གྱུར་པ་ མཚར ༎ ༢༨༧

इदं मघोनः कुलिशं धारासंनिहितानलं ।
स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते ॥ २८८ ॥

ཙེ་མོ་ དག་ལ་ མེ་གནས་པ །
བརྒྱ་བྱིན་གྱི་ ནི་ རྡོ་རྗེ་ གང་ །
འདི་ནི་ དྲན་ན་ ལྷ་མིན་ གྱི །
བུད་མེད་ མངལ་ ནི་ ལྷུང་བར་བྱེད ॥ ༢༨༨

वाच्यस्याग्राम्यता योनिर्माधुर्ये दर्शितो रसः ।
इह त्वष्टरसायत्ता रसवत्ता स्मृता गिरां ॥ २८९ ॥

སྙན་པ་ གྲོང་པ་ ཉིད་མིན་ སྐྱེས །
བརྗོད་བྱ་ཡི་ནི་ ཉམས་ དག་ བསྟན །
འདིར་ནི་ ཉམས་ བརྒྱུད་ དབང་བྱས་ཏེ །
ཚིག་རྣམས་ ཉམས་དང་ལྡན་པར་ བཤད ॥ ༢༨༩

अपकर्त्ताहमस्मीति हृदि ते मा स्म भूद्भयम् ।
विमुखेषु न मे खड्गः प्रहर्तुं जातु वाञ्छति ॥ २९० ॥

བདག་ནི་ གནོད་པ་བྱེད་པོ་ ཞེས།
ཁྱོད་ཀྱི་ སྙིང་ལ་ འཛིགས་ མ་བྱུང་།
བདག་གི་ རལ་གྲི་ཕྱིར་ ཕྱོགས་རྣམས།
ནམ་ཡང་ འཇོམས་པར་ འདོད་ མ་ཡིན།། ༢༩༠

[31a] **इति मुक्तः परो युद्धे निरुद्धो दर्पशालिना ।**
पुंसा केनापि तज्ज्ञयमूर्जस्वीत्येवमादिकं ॥ २९१ ॥

ཞེས་པ་ སྐྱེས་བུ་ དྲེགས་ལྡན་ འགས།
གཡུལ་དུ་ གཞན་ནི་ བཀག་བྱས་ནས།
གཏོང་བ་ དེ་ལྟ་བུ་ ལ་སོགས།
གཟི་བརྗིད་ལྡན་པར་ ཤེས་པར་བྱ།། ༢༩༡

अर्थमिष्टमनाख्याय साक्षात्तस्यैव सिद्धये ।
यत्प्रकारान्तराख्यानं पर्यायोक्तन्तदिष्यते ॥ २९२ ॥

འདོད་དོན་ དངོས་སུ་ མ་བརྗོད་པར།
དེ་ཉིད་ འགྲུབ་པར་བྱ་བའི་ ཕྱིར།

རྣམ་པ་ གཞན་དག་ བརྗོད་པ་ གང་ །
དེ་ནི་ རྣམ་གྲངས་ བརྗོད་པར་ འདོད ॥ ༢༩༢

दशत्यसौ परभृतः सहकारस्य मञ्जरीम् ।
तमहं वारयिष्यामि युवाभ्यां स्वैरमास्यताम् ॥ २९३ ॥

ས་ཧ་ཀཱ་རའི་ སྙེ་མ་རྣམས །
གཞན་གྱིས་གསོལ་ འདིས་ ཟ་བར་བྱེད །
དེ་ནི་ བདག་གིས་ བཟློག་པར་བགྱི །
ཁྱེད་ གཉིས་ དལ་གྱིས་ འདུག་པར་མཛོད ॥ ༢༩༣

संगमय्य सखीं यूना संकेते तद्रतोत्सवम् ।
निर्वर्त्तयितुमिच्छन्त्या कयाप्यपसृतं ततः ॥ २९४ ॥

གྲོགས་མོ་ སྐྱེས་ལྡན་ ལྡན་བྱས་ནས །
དེ་དག་འདུས་པར་ དགའ་བ་ཡི །
དགའ་སྟོན་ སྒྲུབ་ཏུ་ གཞུག་ འདོད་པས །
འགའ་ཞིག་ དེ་ནས་ སོང་བར་གྱུར ॥ ༢༩༤

किंचिदारभमाणस्य कार्यं दैवबलात्पुनः ।
तत्साधनसमापत्तिर्या तदाहुः समाहितम् ॥ २९५ ॥

བྱ་བ་ འགའ་ཞིག་ རྩོམ་པ་ལ།
སྐལ་བ་ཡི་ ནི་ སྟོབས་ལས་ ཀྱང་།
དེ་ཡི་ སྒྲུབ་བྱེད་ ཕུན་ཚོགས་ གང་།
དེ་ ནི་ ཀུན་ཏུ་ ཕན་པར་ བརྗོད། ། ༢༩༤

मानन्तस्या निराकर्तुं पादयोर्मे नमस्यतः ।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितं ॥ २९६ ॥

ཁེངས་པ་ གཞོམ་ཕྱིར་ དེ་ཡི་ ནི།
རྐང་པ་དག་ལ་ ཕྱག་འཚལ་བ།
བདག་ལ་ ཕན་ཕྱིར་ སྐལ་བ་ཡི།
འབྲུག་གི་ སྒྲ་ འདི་ སྒྲགས་པར་ གྱུར། ། ༢༩༥

आशयस्य विभूतेर्वा यन्महत्त्वमनुत्त[31b]रं ।
उदात्तं नाम तम्प्राहुरलंकारं मनीषिणः ॥ २९७ ।:

བསམ་པ་ ལམ་ ནི་ འགྲོར་པ་ ཡི །
ཆེན་པོ་ ཉིད་ནི་ བླ་མེད་ གང་ །
དེ་ ནི་ རྒྱ་ཆེ་ ཞེས་པ་ཡི །
རྒྱན་དུ་ མཁས་པ་རྣམས་ཀྱིས་ བརྗོད ॥ ༢༩༧

गुरोः शासनमत्येतुं न शशाक स राघवः ।
यो रावणशिरश्छेदकार्यभारेप्यविक्लवः ॥ २९८ ॥

ར་བ་ཎ་ཡི་ མགོ་གཅོད་པའི །
བྱ་བའི་ ཁུར་ ཡང་ བཟོད་པ་ཡི །
ར་གྷུའི་བུ་ དེས་ བླ་མ་ཡི །
བཀའ་ལས་ འདའ་བར་ ནུས་མ་ གྱུར ॥ ༢༩༨

रत्नभित्तिषु संक्रान्तैः प्रतिबिम्बशतैर्वृतः ।
ज्ञातो लङ्केश्वरः कृच्छ्रादाञ्जनेयेन तत्त्वतः ॥ २९९ ॥

རིན་ཆེན་ རྩིག་པ་ ལ་ འཕོས་པའི །
གཟུགས་བརྙན་ བརྒྱ་ཡིས་ བསྐོར་གྱུར་པ །

ལངྐའི་དབང་ཕྱུག་ དེ་ ཁྲོ་ན།
ཨརྫུ་ན་ བུས་ དཀའ་བས་ ཤེས ॥ ༢༩༩

पूर्वत्राशयमाहात्म्यमत्राभ्युदयगौरवं ।
सुव्यञ्जितमतिव्यक्तमुदात्तद्वयमप्यदः ॥ ३००

སྔ་མར་ བསམ་པའི་ བདག་ཉིད་ཆེ།
འདིར་ནི་ མངོན་པར་ འབྱོར་པས་ བརླིང་།
ཀྲུ་ཆེ་ གཉིས་པོ་ འདི་དག་ ཀྱང་།
རབ་ཏུ་ གསལ་བར་ མཚོན་པ་ ཡིན ॥ ༣༠༠

अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थदर्शनं ।
न पञ्चेषुः स्मरस्तस्य सहस्रं पत्त्रिणामिति ॥३०१॥

བསྙོན་དོར་དག་ ནི་ བསྙོན་བྱས་ནས།
དོན་གཞན་ ཅུང་ཟད་ བརྗོད་པ་ སྟེ།
འདོད་པ་དག་ནི་ མདའ་ལྔ་པ།
མ་ཡིན་ སྒྲོ་ལྡན་ སྟོང་ཕྲག་ ཡོད ॥ ༣༠༡

चन्दनं चन्द्रिका मन्दो गन्धवाही च दक्षिणः ।
सेयमग्निमयी सृष्टिश्शीता किल परान्प्रति ॥३०२॥

ཙནྡན་ ཟླ་འོད་ དལ་བུ་ ཡི །
ལྷོ་ ཕྱོགས་ དྲི་ཡི་ བཞོན་པ་ འདི །
མེ་ཡི་ རང་བཞིན་ སྤྲོ་བ་ སྟེ །
གཞན་གྱི་ ངོར་ནི་ བསིལ་ ཞེས་ གྲགས ॥ ༢༠༢

शैशिर्यमभ्युपेत्यैवं परेष्वात्मनि कामिना ।
औष्णप्रदर्शनात्तस्य सैषा विषयनिह्नुतिः ॥३०३॥

འདོད་ལྡན་གྱིས་ ནི་ གཞན་ ལ་ རེ །
བསིལ་བར་ ཁས་བླངས་ བདག་ཉིད་ལ །
ཚ་བ་ ཉིད་དུ་ རབ་བསྟན་ ཕྱིར །
འདི་ནི་ ཡུལ་ལ་ བསྙོན་དོར་རོ ॥ ༢༠༣

अमृतस्यन्दि[32a]किरणश्चन्द्रमा नाम नो मतः ।
अन्य एवायमर्थात्मा विषनिष्यन्दिदीधितिः ॥३०४॥

བདུད་རྩི་ ཟག་པའི་ འོད་ཟེར་ཅན།
ཟླ་བ་ ཞེས་པར་ བདག་ཅག་ འདོད།
དོན་གྱི་ བདག་ཉིད་ འདི་ནི་ གཞན།
དུག་ཟག་ ཟེ་དང་ ལྡན་པ་ ཉིད།། ༣༠༤

इति चन्द्रत्वमेवेन्दोरनिवर्त्यार्थान्तरात्मना।
उक्तं स्मरात्तनेत्येषा स्वरूपापह्नुतिर्मता ॥३०५॥

ཅེས་པ་ ཟླ་བའི་ ཟླ་ དངོས་ ཉིད།
བཟློག་ནས་ དོན་ གཞན་ བདག་ཉིད་ ནི།
འདོད་པས་ གཟིར་བ་ བརྗོད་པའི་ ཕྱིར།
འདི་ནི་ རང་བཞིན་ བསྙོན་དོར་ འདོད།། ༣༠༥

उपमापह्नुतिः पूर्वमुपमास्वेव दर्शिता।
इत्यपह्नुतिभेदानां लक्ष्यो लक्ष्येषु विस्तरः ॥३०६॥

དཔེ་ཡི་ བསྙོན་དོར་ སྔར་ ཉིད་དུ།
དཔེ་རྣམས་ ལ་ ནི་ རབ་བསྟན་ཏོ།

འདི་ཡིས་ བསྐྱོན་ དོར་ དབྱེ་བ་ རྣམས །
མཚོན་བྱ་དག་ ལ་ རྒྱ་ཆེར་ མཚོན ༎ ༣༠༦

श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं वचः ।
तदभिन्नपदं भिन्नपदप्रायमिति द्विधा ॥३०७॥

སྦྱར་བ་ གཟུགས་གཅིག་ལྡན་པའི་ ཚིག །
དུ་མའི་ དོན་ཅན་ ཉིད་དུ་ འདོད །
དེ་ཚིག་ ཐ་དད་ མིན་པ་ དང་ །
ཐ་དད་ ཚིག་ འདྲ་ རྣམ་པ་གཉིས ༎ ༣༠༧

असावुदयमारूढः कान्तिमान् रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुभिः करैः ॥३०८॥

ཨུ་ད་ཡ་ གནས་ མཛེས་པ་ཅན །
དཀྱིལ་འཁོར་ ལ་ ཆགས་ རྒྱལ་པོ་ འདི །
སྨྲི་དུ་ཀ་རས་ འཇིག་རྟེན་ གྱི །
ཡིད་ནི་ རབ་དུ་འཕྲོག་པར་བྱེད ༎ ༣༠༨

दोषाकरेण सम्बद्धनक्षत्रपथवर्त्तिना ।
राज्ञा प्रदोषो मामित्थमप्रियं किन्न बाधते ॥३०९॥

ཀྱུ་སྐར་ ལམ་ ལ་ རབ་གནས་པ །
མཚན་མོར་བྱེད་པ་ དང་ འབྲེལ་ནས །
སྐྱོད་ལ་ ཡིས་ནི་ བདག་ འདི་ལྟར །
དགའ་བ་ མེད་པར་ ཅིས་ མ་ མནར ॥ ༣༠༩

उपमारूपकाक्षे[32b]पव्यतिरेकादिगोचराः ।
प्रागेव दर्शिताः श्लेषा दश्यन्ते केचनापरे ॥३१०॥

དཔེ་ དང་ གཟུགས་ཅན་ འགོག་པ་ དང་ །
ལྡོག་པ་ཅན་ སོགས་ སྤྱོད་ཡུལ་ཅན །
སྦྱར་བ་ གོང་དུ་ བསྟན་ཟིན་ཏེ །
གཞན་པ་ འགའ་ཞིག་ བསྟན་པར་བྱ ॥ ༣༡༠

अस्त्यभिन्नक्रियः कश्चिदविरुद्धक्रियोपरः ।
विरुद्धकर्मा वास्त्यन्यः श्लेषो नियमवानपि ॥३११॥

འགའ་ཞིག་ བྱ་བ་ ཐ་དད་མིན །
གཞན་པ་ བྱ་བ་ འགལ་མིན་ ཡོད །
འགལ་བའི་ ལས་ཅན་དག་ ཀྱང་ གཞན །
སྦྱར་བ་ ངེས་པ་ཅན་ ཡང་ ཡོད ॥ ༣༢༢

नियमाक्षेपरूपोक्तिरविरोधी विरोध्यपि ।
तेषां निदर्शनेष्वेव रूपमाविर्भविष्यति ॥३१२॥

ངེས་པ་ འགོག་པ་ གཟུགས་ བརྗོད་ དང་ །
འགལ་མེད་ འགལ་བ་ཅན་ ཡང་སྟེ །
དེ་དག་ རྣམས་ཀྱི་ རང་བཞིན་ ཡང་ །
དཔེར་བརྗོད་ དག་ལ་ གསལ་བར་འགྱུར ॥ ༣༢༣

वक्रस्वभावमधुराः शंसन्त्यो रागमुल्बणम् ।
दृशो दूत्यश्च कर्षन्ति कान्ताभिः प्रेषिताः प्रियान् ॥३१३॥

འཁྱོག་ཅིང་ ཡིད་འོང་ རང་བཞིན་ཅན །
ཆགས་པ་ གསལ་བ་སྟོནར་ བྱེད་མ །

མཛེས་མས་ བསླུལ་བའི་ མིག་ དང་ ནི །
ཟོ་ཉ་མོས་ ཀྱང་ མཛའ་བོ་ འགུགས ༎ ༣༡༣

**मधुरा रागवर्धिन्यः कोमलाः कोकिलागिरः ।
आकर्ण्यन्ते मदकलाः श्लिष्यन्ते चासितेक्षणाः ॥३१४॥**

ཡིད་འོང་ ཆགས་པ་འཕེལ་བར་བྱེད །
འཛམ་ཞིང་ མོས་པའི་ གདངས་སྙན་ཅན །
ཁུ་བྱུག་སྨྲ་ ནི་ ཐོས་གྱུར་ཏེ །
དཀར་མིན་མིག་ཅན་དག་ལ་ འཁྱུད ༎ ༣༡༤

**रागमादर्शयन्नेष वारुणीयोगवर्धितः ।
पराभवति घर्मांशुरङ्गजस्तु विजृम्भते ॥३१५॥**

ཆུ་མ་ དང་ སྦྱར་ འཕེལ་བ་ཡི །
དམར་བ་ རབ་ཏུ་སྟོན་བྱེད་ ཅིང་ །
ཚ་ཟེར་ཅན་ འདི་ ནུབ་གྱུར་ཏེ །
ལུས་སྐྱེས་ དག་ ནི་ རྣམ་པར་རྒྱས ༎ ༣༡༥

निस्त्रिंशत्वमसावेव धनुष्येवास्य वक्रता ।
शरेष्वेव नरेन्द्रस्य [33a] मार्गणत्वश्च वर्त्तते ॥३१६॥

རལ་གྲི་ཉིད་ལ་ནི་སྡི་ཤིཾ།
གཞུ་ཉིད་ལ་ནི་འཁྱོག་པོ་ཉིད།
མི་དབང་འདི་ཡི་སྒཱ་ཆ།
མདའ་རྣམས་ཉིད་ལ་གནས་པ་ཡིན། ༣༡༦

पद्मानामेव दण्डेषु कण्टकस्त्वयि रक्षति ।
अथवा दृश्यते रागिमिथुनालिंगनेष्वपि ॥३१७॥

ཁྱོད་ཀྱིས་བསྲུངས་ལ་ཚེར་མ་ནི།
པདྨའི་ཡུ་བ་ཉིད་ལ་འོ།
འོན་ཀྱང་ཆགས་ཅན་འཁྲིག་པ་ལ།
འཁྱུད་པར་གྱུར་པ་རྣམས་ལའང་མཐོང༌། ༣༡༧

महीभृद्भूरिकटकस्तेजस्वी नियतोदयः ।
दक्षः प्रजापतिश्चासीत् स्वामी शक्तिधरश्च सः ॥३१८॥

ས་འཛིན་ ཀ་ཊ་ཀ་ མང་ཞིང་ །
གཟི་བརྗིད་ལྡན་པ་ ངེས་པར་དར །
སྐྱེ་དགུའི་བདག་ བྱུང་ སྒྱུར་བ་སྟེ །
རྗེ་བོ་ ནུས་པ་ འཛིན་ ཡང་དེ ॥ ༣༡༨

अच्युतोप्यवृषोच्छेदी राजाप्यविदितक्षयः ।
देवोप्यविबुधो जज्ञे शंकरोप्यभुजंगवान् ॥३१९॥

ཉམས་མེད་ ཡིན་ ཡང་ ཆོས་གཅོད་མིན །
རྒྱལ་པོ་ ཡིན་ ཡང་ ཟད་མི་ཤེས །
བདེ་བྱེད་ཡིན་ ཡང་ ལག་འགྲོ་མེད །
ལྷ་ཡང་ བི་བུ་དྷ་ མིན་ཤེས ॥ ༣༡༩

गुणजातिक्रियादीनां यद्वैकल्यदर्शनं ।
विशेषदर्शनायैव सा विशेषोक्तिरिष्यते ॥३२०॥

ཁྱད་པར་ རབ་ཏུ་ བསྟན་པའི་ཕྱིར །
ཡོན་ཏན་ རིགས་ དང་ བྱ་བ་ སོགས །

གང་དུ་ མ་ཚང་ཉིད་ བསྟན་པ །
དེ་ནི་ ཁྱད་པར་ བརྗོད་པར་ འདོད ॥ ༣༢༠

न कठोरं न चातीक्ष्णमायुधं पुष्पधन्वनः ।
तथापि जितमेवासीदमुना भुवनत्रयं ॥३२१॥

མེ་ཏོག་ གཞུ་ཅན་ དག་གི་ མཚོན །
རྩུབ་པ་མ་ཡིན་ རྣོ་བའང་མིན །
དེ་ལྟ་ན་ ཡང་ འདི་ཡིས་ནི །
ས་གསུམ་དག་ལས་ རྒྱལ་བར་གྱུར ॥ ༣༢༡

न देवकन्यका नापि गन्धर्वकुलसंभवा ।
तथाप्येषा तपोभङ्गं विधातुं वेधसोप्यलं ॥३२२॥

འདི་དག་ ལྷ་ཡི་ བུ་མོ་ མིན །
དྲི་ཟའི་ རིགས་ལས་ བྱུང་བའང་ མིན །
དེ་ལྟ་ མོད་ཀྱི་ ཚངས་པའི་ ཡང་ །
དཀའ་ཐུབ་ གཞོམ་པ་ སྒྲུབ་པར་ ནུས ॥ ༣༢༢

न बद्धा भ्रुकु[33b]टिर्नापि स्फुरितो दशनच्छदः ।
न च रक्ताभवद्दृष्टिर्ध्वस्तञ्च द्विषतां कुलं ॥३२३॥

ཁྲོ་གཉེར་ དག་ནི་ མ་བསྡུས་ ཤིང་ །
སོ་ཡི་ གཡོགས་ ཀྱང་ མ་བསྒྲིད་ལ །
མིག་ཀྱང་ དམར་པོར་ མ་གྱུར་པར །
དགྲ་ཡི་ རིགས་ ནི་ ཉམས་པར་བྱས ༎ ༣༢༢

न रथा न च मातंगा न हया न च पत्तयः ।
स्त्रीणामपाङ्गदृष्ट्यैव जीयते जगतां त्रयं ॥३२४॥

ཤིང་རྟ་ མེད་ ཅིང་ གླང་པོའང་ མེད །
རྟ་མེད་ རྐང་ཐང་མེད་པར་ ཡང་ །
ཟུར་མིག་ཉིད་ ཀྱིས་ བུད་མེད་རྣམས །
འགྲོ་བ་ གསུམ་པོ་ དག་ལས་ རྒྱལ ༎ ༣༢༨

एकचक्रो रथो यन्ता विकलो विषमा हयाः ।
आक्रामत्येव तेजस्वी तथाप्यर्को जगत्त्रयं ॥३२५॥

ཤིང་རྟ་ འཁོར་ལོ་གཅིག་པ་དང་ །
ཁ་ལོ་པ་ ཉམས་ རྟ་མི་མཉམ །
དེ་ལྟ་ན་ ཡང་ གཟི་བརྗིད་ཅན །
ཉི་མས་ འགྲོ་བ་ གསུམ་པོ་ མནན ॥ ༣༢༥

सैषा हेतुविशेषोक्तिस्तेजस्वीतिविशेषणात् ।
अयमेव क्रमोन्येषां भेदानामपि कल्प्यते ॥३२६॥

གཟི་བརྗིད་ཅན་ སོགས་ ཁྱད་པར་ལས །
འདི་ནི་ རྒྱུ་ཡི ཁྱད་པར་ བརྗོད །
རིམ་པ་ འདི་ཡིས་ གཞན་གྱི་ ནི །
དབྱེ་བ་རྣམས་ ཀྱང་ བརྟག་པར་བྱ ॥ ༣༢༦

विवक्षितगुणोत्कृष्टैर्यत्समीकृत्य कस्यचित् ।
कीर्त्तनं स्तुतिनिन्दार्थं सा स्मृता तुल्ययोगिता ॥३२७॥

བརྗོད་ འདོད་ ཡོན་ཏན་ ཁྱད་འཕགས་ དང་ །
མཚུངས་པར་ བྱས་ནས་ འགའ་ཞིག་ནི །

བསྟོད་ སྨད་ དོན་དུ་ བསྒྲགས་པ་ གང་ །
དེ་ནི་ མཚུངས་པར་ སྦྱོར་བར་ བཤད ॥ ༣༢༧

यमः कुबेरो वरुणः सहस्राक्षो भवानपि ।
बिभ्रत्यनन्यविषयां लोकपाला इति श्रुतिम् ॥३२८॥

གཤིན་རྗེ་ ལུས་ངན་ ཆུ་ལྷ་དང་ །
མིག་སྟོང་པ་ དང་ ཁྱོད་ཉིད་ ཀྱང་ །
འཇིག་རྟེན་ སྐྱོང་བ་ ཞེས་པའི་ སྒྲ །
ཡུལ་གཞན་མེད་པར་ རྣམ་པར་འཛིན ॥ ༣༢༨

संगतानि मृगाक्षीणां तडिद्विलसितन्यपि ।
क्षणद्वयन्न तिष्ठ[34a]ति घनरब्धान्यपि स्वयं ॥३२९॥

རི་དགས་ མིག་ དང་ འགྲོགས་པ་ དང་ །
གློག་གི་ རྩེ་དགའ་དག་ དང་ ནི །
སྤྲིན་གྱི་ རྩོམ་པའང་ རང་བཞིན་གྱིས །
སྐད་ཅིག་ གཉིས་པར་ མི་ གནས་སོ ॥ ༣༢༩

विरुद्धानाम्पदार्थानां यत्र संसर्गदर्शनं ।
विरोधसाधनायैव स विरोधः स्मृतो यथा ॥३३०॥

འགལ་ཟླ་ སྒྲུབ་བྱེད་ སྣང་དུ་ནི། །
གང་དུ་ དངོས་པོ་ འགལ་བ་ རྣམས། །
ཡང་དག་ འགྲོགས་པར་ རབ་བསྟན་པ། །
དེ་ནི་ འགལ་བ་ བཤད་ དེ་ དཔེར། ། ༣༣༠

कूजितं राजहंसानां वर्द्धते मदमञ्जुलं ।
क्षीयते च मयूराणां रुतमुत्क्रान्तसौष्ठवं ॥३३१॥

ངང་པའི་ རྒྱལ་པོ་ རྣམས་དག་ནི། །
སྨྱོས་པའི་ གདངས་སྙན་ ཅ་ཅོ་ འཕེལ། །
རྨ་བྱ་རྣམས་ཀྱི་ སྒྲ་དག་ནི། །
ཡིད་འོང་ ཉིད་དང་ བྲལ་བས་ཉམས། ། ༣༣༡

प्रावृषेण्यैर्जलधरैरम्बरं दुर्दिनायते ।
रागेण पुनराक्रान्तं जायते जगतां मनः ॥३३२॥

དབྱར་སྐྱེས་ ཆུ་འཛིན་དག་གིས་ནི། །
ནམ་མཁའ་ ཡུལ་ངན་ ལྟ་བུར་ སྤྱོད། །
ཆགས་པ་ ཡིས་ ཀྱང་ འགྲོ་བ་ཡི། །
ཡིད་ནི་ ཀུན་དུ་ ཆགས་པར་གྱུར། ། ༣༣༢

तनुमध्यं पृथुश्रोणि रक्तौष्ठमसितेक्षणं ।
नतनाभि वपुः स्त्रीणां कं न हन्त्युन्नतस्तनं ॥३३३॥

སྐེད་པ་ ཕྲ་ ཞིང་ རོ་སྨད་ སྦོམ། །
མཆུ་དམར་ མིག་ནི་ དཀར་བ་ མིན། །
ལྟེ་བ་ དམའ་ ཞིང་ ནུ་མ་ མཐོ། །
བུད་མེད་ ལུས་ ཀྱིས་ སུ་ མ་ བཅོམ། ། ༣༣༣

मृणालबाहु रम्भोरु पद्मोत्पलमुखेक्षणं ।
अपि ते रूपमस्माकं तन्वि तापाय कल्पते ॥३३४॥

པད་ཙའི་ ལག་པ་ ཆུ་ཤིང་ བརླ། །
པདྨའི་གདོང་ དང་ ཨུཏྤལ་ མིག །

ཁྱོད་ཀྱི་གཟུགས་ཀྱིས་ བདག་ཅག་རྣམས།
གདུང་ནུས་ མིན་ནམ་ ལུས་ཅན་མ། ༣༣༨

उद्यानमारुतोद्धूताश्चूताश्चम्पकरेणवः ।
उदश्रयन्ति पान्यानामस्पृशन्तोपि लोचनम् ॥३३५॥

སྐྱེད་ཚལ་ རླུང་གིས་ རབ་བསྐྱོད་པ།
ཙཱུ་ཏ་ཙམྤ་ཀ་ཡི་རྡུལ།
རིག་པ་མིན་ ཡང་ འགྲོན་པོ་ཡི།
མིག་ལ་ མཆི་མ་ཟག་པར་བྱེད། ༣༣༥

कृष्णार्जुनानुरक्तापि दृष्टिः कर्णा[34b]वलम्बिनी ।
याति विश्वसनीयत्वं कस्य त कलभाषिणि ॥३३६॥

སྙན་པར་སྒྲོགས་མ་ ཁྱོད་ཀྱི་མིག
ནག་དཀར་རྗེས་སུ་དམར་བ་ ཡང་།
རྣ་བ་དག་ལ་ བརྟེན་པ་ ནི།
སུ་ཡི་ ཡིད་བརྟན་ཉིད་དུ་འགྱུར། ༣༣༦

इत्यनेकप्रकारोयमलंकारः प्रतीयते ।
अप्रस्तुतप्रशंसा स्यादप्रक्रान्तेप्सितास्तुतिः ॥३३७॥

དེ་ལྟར་རྒྱན་འདི་རྣམ་པ་ ནི །
དུ་མ་ཉིད་དུ་ རབ་རྟོགས་བྱ །
སྐབས་ མིན་ འདོད་པས་ བསྟོད་པ་ ནི །
སྐབས་སུ་ མ་བབ་ བསྟོད་པ་ ཡིན ༎ ༣༣༧

सुखं जीवन्ति हरिणा वनेष्वपरसेविनः ।
अर्थैरयत्नसुलभैर्जलदर्भाङ्कुरादिभिः ॥३३८॥

གཞན་མི་བསྟེན་པ་ རི་དྭགས་རྣམས །
འབད་མེད་ རྙེད་པར་སླ་བའི་ནོར །
ཆུ་དང་རྩྭ་ཡི་མྱུག་སོགས་ཀྱིས །
ནགས་རྣམས་སུ་ ནི་ བདེ་བར་ འཚོ ༎ ༣༣༨

सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते ।
राजानुवर्त्तनक्लेशनिर्विण्णेन मनस्विना ॥३३९॥

རྒྱལ་པོའི་རྗེས་འབྲངས་ཉོན་མོངས་པ །
ཤིན་ཏུ་ སྐྱོ་བའི་ ཡིད་ཅན་གྱིས །
སྐབས་སུ་ མ་བབ་ཉིད་དུ་ འདིར །
རི་དྭགས་ སྤྱོད་ཚུལ་ འདི་དག་ བསྔགས ॥ ༣༣༩

यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ स्मृता ।
दोषाभासा गुणा एव लभन्ते ह्यत्र सन्निधिं ॥३४०॥

གལ་ཏེ་ སྨད་པ་ བཞིན་ བསྟོད་ནས །
སྐྱོན་ ལྟར་ སྣང་བའི་ཡོན་ཏན་ཉིད །
གང་དུ་ ཉེ་བར་ཐོབ་གྱུར་པ །
འདི་ནི་ ཟོལ་གྱིས་བསྟོད་པར་ བཤད ॥ ༣༤༠

तापसेनापि रामेण जितेयं भूतधारिणी ।
त्वया राज्ञापि सैवेयं जिता मा भून्मदस्तव ॥३४१॥

རཱ་མ་དཀའ་ཐུབ་པ་ཡིས་ ཀྱང་ །
འབྱུང་པོ་ འཛིན་མ་ འདི་ལས་རྒྱལ །

དེ་ཉིད་ རྒྱལ་པོ་ ཁྱོད་ཀྱིས་ ཀྱང་ །
འདི་ལ་ ཁྱོད་ནི་ རྒྱགས་ མ་ མཛད ॥ ༣༠༡

पुंसः पुराणादाच्छिद्य श्रीस्त्वया परिभुज्यते ।
राजन्निक्ष्वाकुवंशस्य किमिदं तव युज्य[35a]ते ॥३४२॥

སྔོན་གྱི་སྐྱེས་བུ་ ལས་ བཅད་ནས །
དཔལ་འདི་ཁྱོད་ཀྱིས་ ཡོངས་སུ་སྤྱོད །
རྒྱལ་པོ་ བུ་རམ་ཤིང་པའི་རྒྱུད །
ཁྱོད་ཀྱི་ འདི་ནི་ རིགས་སམ་ཅི ॥ ༣༠༢

भुजंगभोगसंसक्ता कलत्रं तव मेदिनी ।
अहंकारः पराङ्कोटिमारोहति कुतस्तव ॥३४३॥

ཁྱོད་ཀྱི་ བཙུན་མོས་ གཞི་ནི །
ལག་འགྲོའི་ ལྡོ་ག་དག་ལ་ཆགས །
ཅི་སླད་ ཁྱོད་ཀྱི་ང་རྒྱལ་ནི །
མཆོག་གི་མཐའ་རུ་ འཛེགས་པར་གྱུར ॥ ༣༠༣

इति श्लेषानुविद्धानामन्येषां चोपलक्ष्यताम् ।
व्याजस्तुतिप्रकाराणामपर्यन्तः प्रविस्तरः ॥३४४॥

དེ་ལྟར་ ཉེ་བར་ མཚོན་པ་ལས །
སྦྱར་བ་ཅན་དང་གཞན་དག་གི །
ཟོལ་གྱིས་བསྟོད་པའི་རྣམ་པ་རྣམས །
རབ་ཏུ་རྒྱ་ཆེ་མཐའ་དང་བྲལ ॥ ༣༨༨

अर्थान्तरप्रवृत्तेन किञ्चित्तत्सदृशं फलं ।
सदसद्वा निदर्श्येत यदि स्यात्तन्निदर्शनं ॥३४५॥

གལ་ཏེ་ དོན་གཞན་འཇུག་པ་ཡིས །
དེ་དང་མཚུངས་པའི་འབྲས་བུ་འགའ །
མཆོག་གམ་ མཆོག་མིན་ སྟོན་བྱེད་པ །
དེ་ནི་ ངེས་པར་བསྟན་པ་ ཡིན ॥ ༣༨༩

उदयन्नेव सविता पद्मेष्वर्पयति श्रियं ।
विभावयितुमृद्धीनां फलं सुहृदनुग्रहं ॥३४६॥

ཉི་མ་ འཆར་བ་ཉིད་ཀྱིས་ ནི །
པདྨ་རྣམས་ལ་ དཔལ་སྟེར་བྱེད །
ཕུན་ཚོགས་རྣམས་ཀྱི་ འབྲས་བུ་དག །
གྲོགས་པོ་རྗེས་འཛིན་ བསྟན་པའི་ཕྱིར ॥ ༢༨༦

याति चन्द्रांशुभिः स्पृष्टा ध्वान्तराजी पराभवं ।
सद्योराजविरुद्धानां सूचयन्ती दुरन्ततां ॥३४७॥

ཟླ་བའི་ཟེར་གྱིས་ རེག་པ་ན །
མུན་པའི་ཕྲེང་བ་ ནུབ་པར་འགྱུར །
འཕྲལ་ལ་རྒྱལ་པོ་ དང་ འགལ་རྣམས །
ངན་པའི་མཐར་འགྱུར་ གསལ་བར་བྱེད ॥ ༢༨༧

सहोक्तिः सहभावस्य कथनं गुणकर्मणां ।
अर्थानां यो विनिमयः परिवृत्तिस्तु सा यथा ॥३४८॥

ཡོན་ཏན་ལས་རྣམས་ ལྷན་ཅིག་གི །
དངོས་པོ་ བརྗོད་པ་ ལྷན་ཅིག་བརྗོད །

དོན་རྣམས་ བསྐྱོལ་བ་ གང་ ཡིན་པ །
ཡོངས་བརྗེས་ཡིན་ཏེ་ དེ་དག་ དཔེར ॥ ༣༤༨

सह दीर्घा मम[35b] श्वासैरिमाः संप्रति रात्रयः ।
पाण्डराश्च ममैवाङ्गैः सह ताश्चन्द्रभूषणाः ॥३४९॥

དེ་ནི་ མཚན་མོ་ འདི་དག་རྣམས །
བདག་གི་དབུགས་དང་ ལྷན་ཅིག་རིང་ །
ཟླ་བའི་རྒྱན་ལྡན་མ་རྣམས་ ཀྱང་ །
བདག་ལུས་ཉིད་ དང་ ལྷན་ཅིག་ སྐྱ ॥ ༣༤༩

वर्द्धते सह पान्थानां मूर्च्छया चूतमञ्जरी ।
पतन्ति च समन्तेषामश्रुभिर्मलयानिलाः ॥३५०॥

འགྲོན་པོ་རྣམས་ཀྱི་ རྨོངས་པ་ དང་ །
ལྷན་ཅིག་ ཙཱུ་ཏའི་ཏོག་པ་རྒྱས །
དེ་དག་ མཆི་མ་ དང་ མཉམ་དུ །
མ་ལ་ཡ་ཡི་རླུང་དག་ འབབ ॥ ༣༥༠

कोकिलालापसुभगाः सुगन्धिवनवायवः ।
यान्ति सार्धं जनानन्दैर्वृद्धिं सुरभिवासराः ॥३५१॥

ཁ་བྱུག་ སྒྲོགས་པའི་སྐལ་བཟང་ དང་ །
ནགས་ཀྱི་རླུང་ ནི་ དྲི་བཟང་ དང་ །
དཔྱིད་ཉིན་ སྐྱེ་བོའི་ཀུན་དགའ་རྣམས །
ལྷན་ཅིག་དག་ཏུ་ འཕེལ་བར་འགྱུར ༎ ༣༥༡

इत्युदाहृतयो दत्ताः सहोक्तेरत्र काश्चन ।
क्रियते परिवृत्तेश्च किञ्चिद्रूपनिरूपणं ॥३५२॥

དེ་ལྟར་ ལྷན་ཅིག་བརྗོད་པ་ཡི །
དཔེར་བརྗོད་ འགའ་ཞིག་ འདིར་ བྱས་ཏེ །
ཡོངས་སུ་བརྗེས་པའི་ རང་བཞིན་ ཡང་ །
ངེས་པར་བསྟན་པ་ ཅུང་ཟད་བྱ ༎ ༣༥༢

शस्त्रप्रहारन्ददता भुजेन तव भूभुजां ।
चिरार्जितं हृतं तेषां यशः कुमुदपाण्डरं ॥३५३॥

ས་སྐྱོང་རྣམས་ལ་ མཚོན་ བསྣུན་པ །
སྟར་བྱེད་ ཁྱོད་ཀྱི་ལག་པ་ཡིས །

དེ་དག་ གྲགས་པ་ ཀུ་མུད་ དཀར །
ཡུན་རིང་དག་ཏུ་ བསྒྲུབས་པ་ གྲོགས ༎ ༣༥༣

आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा ।
पातु वः परमज्योतिरवाङ्मनसगोचरम् ३५४॥

མངོན་པར་འདོད་པའི་དངོས་པོ་ལ །
སྨོན་པ་ ཤིས་བརྗོད་ ཅེས་བྱ་ དཔེར །
ངག་ཡིད་ སྤྱོད་ཡུལ་ མ་ཡིན་པའི །
སྣང་བ་ དམ་པས་ ཁྱོད་ལ་ སྲུངས ༎ ༣༥༤

अनन्वयससंदेहावुपमास्वेव दर्शितौ ।
उपमा रूपकं[36a]चापि रूपकेष्वेव कीर्त्तितम् ॥३५५॥

རྗེས་འགྲོ་མེད་དང་ཐེ་ཚོམ་ཅན །
དག་ནི་ དཔེ་རྣམས་ཉིད་ལ་ བསྟན །
དཔེ་ཡི་གཟུགས་ཅན་ དག་ ཀྱང་ འདིར །
གཟུགས་ཅན་རྣམས་ལ་ ངེས་པར་བསྒྲགས ༎ ༣༥༥

उत्प्रेक्षाभेद एवासावुत्प्रेक्षावयवोपि च ।
नानालंकारसंसृष्टिः संसृष्टिः कथ्यते पुनः ॥३५६॥

རབ་རྟོག་ཆ་ཤས་ འདི་ ཡང་ ནི །
རབ་རྟོག་དག་གི་དབྱེ་བ་ཉིད །
ཐ་དད་རྒྱན་རྣམས་བསྲེས་པ་ནི །
སྤེལ་མ་དག་ཏུ་ བརྗོད་པ་སྟེ ॥ ༣༥༦

अङ्गाङ्गिभावसंस्थानं सर्वेषां समकक्षता ।
इत्यलङ्कारसंसृष्टौ लक्षणीया द्वयी गतिः ॥३५७॥

ཡན་ལག་ཡན་ལག་ཅན་དངོས་ཀྱི །
སྐབས་ དང་ ཐམས་ཅད་ སྟོབས་མཚུངས་ཉིད །
ཅེས་པའི་ལུགས་ གཉིས་ སྤེལ་མ་ཡི །
རྒྱན་དག་ལ་ ནི་ མཚོན་པར་བྱ ॥ ༣༥༧

आक्षिपन्त्यरविन्दानि तव मुग्धे मुखश्रियं ।
कोषदण्डसमग्राणां किमेषामस्ति दुष्करं ॥३५८॥

མཛེས་མ་ ཁྱོད་ཀྱི་ བཞིན་གྱི་ དཔལ།
པདྨ་དག་གིས་ འགོག་པར་བྱེད།
མཛོད་དང་ ཨུ་བ་ ཕུན་ཚོགས་པ།
འདི་ལ་ ཁྲུ་ དཀར་ ཅི་ ཞིག་ ཡོད། ༣༥༨

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियं ।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयं ॥३५९॥

རང་བཞིན་ བརྗོད་དང་ འཁྱོག་ བརྗོད་ཅེས།
ངག་གི་ རང་བཞིན་ ཐ་དད་ གཉིས།
འཁྱོག་པོར་ བརྗོད་པ་ ཐམས་ཅད་ལ།
ཕལ་ཆེར་ སྦྱར་བས་ དཔལ་རྒྱས་བྱེད། ༣༥༩

भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणः ।
भावः कवेरभिप्रायः काव्येष्वासिद्धि यः स्थितः ॥३६०॥

སྙན་ངག་མཁན་ བསམ་དགོངས་པ་ སྟེ།
སྙན་ངག་ གྲུབ་པར་ གང་ གནས་པ།

རབ་སྦྱོར་ ཡུལ་གྱི་ཡོན་ཏན་ཅན། །
དེ་ནི་ དགོངས་པ་ཅན་ ཞེས་ བརྗོད། ། ༣༦༠

परस्परोपकारित्वं सर्वेषां वस्तुपर्वणाम् ।
विशेषणानां व्यर्थानामक्रिया [36b] स्थानवर्णनं ॥ ३६१

དངོས་པོ་ཡི་ ནི་ ཚིགས་རྣམས་ཀུན། །
ཕན་ཚུན་ ཕན་པར་བྱེད་པ་ ཉིད། །
དོན་དང་ བྲལ་བའི་ ཁྱད་པར་ རྣམས། །
མ་བྱས་ གནས་སུ་ བསྟགས་པ་ དང་། ། ༣༦༡

व्यक्तिरुक्तिक्रमबलाद्गम्भीरस्यापि वस्तुनः ।
भावायत्तमिदं सर्वमिति तं भाविकं विदुः । ३६२

བརྗོད་རིམ་ སྟོབས་ ལས་ དངོས་པོ་ ནི། །
ཟབ་མོ་དག་ ཀྱང་ གསལ་བ་སྟེ། །
དེ་ཀུན་ དགོངས་པའི་དབང་གྱུར་ ཕྱིར། །
དེ་དག་ དགོངས་པ་ཅན་ ཞེས་ རིག། ༣༦༢

यच्च सन्ध्यङ्गवृत्त्यङ्गलक्षणाद्यागमान्तरे ।
व्यावर्णितमिदं चेष्टमलङ्कारतयैव नः ॥ ३६३

གང་ཡང་ མཚམས་ སྦྱོར་ ཡན་ལག་ དང་ །
འཇུག་པའི་ཡན་ལག་ མཚན་ ཉིད་ སོགས །
ལུང་ གཞན་ དག་ཏུ་ བརྗོད་ འདི་ ཡང་ །
རྒྱན་ཉིད་དུ་ ནི་ བདག་ཅག་ འདོད ॥ ༣༦༣

पन्था स एष विवृतः परिमाणवृत्त्या संहृत्य विस्तरमनन्तमलंक्रियाणां ।
वाचामतीत्य विषयं परिवर्त्तमानानभ्यास एव विवरीतुमलं विशेषान् ॥ ३६४

རྒྱ་ཆེ་ མཐའ་ཡས་ རབ་བསྡུས་ཚད་དུ་ གྱུར་པ་ཡི །
རྒྱན་རྣམས་ དག་གི་ལམ་ འདི་ཉིད་ ནི་རྣམ་པར་ཕྱེ །
བརྗོད་པའི་ཡུལ་ལས་ འདས་པར་ ཡོངས་སུ་གནས་པ་ཡི །
ཁྱད་པར་རྣམས་ནི་ གོམས་པ་ཉིད་ཀྱིས་ དབྱེ་བར་ནུས ॥ ༣༦༤

इत्याचार्यदण्डिनः कृतौ काव्यादर्शेऽर्थालङ्कारो नाम द्वितीयः परिच्छेदः ॥

ཞེས་ སློབ་དཔོན་ • དབྱུག་པ་ཅན་གྱིས་ མཛད་པ་ སྙན་ངག་ མེ་ལོང་ལས་ དོན་གྱི་རྒྱན་ ཅེས་བྱ་བ་ ཡོངས་སུ་བཅད་པ་ གཉིས་པའོ ॥

CHAPTER III

अव्यपेतव्यपेतात्मा व्यावृत्तिर्वर्णसंहतेः ।
यमकं तच्च पादानामादिमध्यान्तगोचरं ॥१॥

བར་མ་ཆོད་དང་ བར་ཆོད་ བདག །
ཡི་གེ་ ཚོགས་པ་ བསྐྱོར་བ་ནི །
ཟུང་ལྡན་ དེ་ཡང་ རྐང་པ་ཡི །
དང་པོ་ བར་ མཐའ་ སྤྱོད་ཡུལ་ཅན ॥ ༡

एकद्वित्रिचतुष्पादयमकानां विकल्पनाः ।
आदिमध्यान्तमध्यान्तमध्याद्याद्यन्तसर्वतः ॥२॥

གཅིག་ གཉིས་ གསུམ་ བཞི་ རྐང་པ་ཡི །
ཟུང་ལྡན་རྣམས་ཀྱི་ རྣམ་རྟོག་ནི །
ཐོག་མ་ བར་ མཐའ་ བར་ དང་ མཐའ །
བར་དང་ ཐོག་མ་ ཐོག་མཐའ་ ཀུན ॥ ༢

[37a] अत्यन्तबहवस्तेषां भेदाः संभेदयोनयः ।
सुकरा दुष्कराश्चैव दश्यन्ते तत्र केचन ॥३॥

ཀུན་ཏུ་ དབྱེ་བ་ ལས་ སྐྱེས་པ །
དེ་དག་ དབྱེ་བ་ ཤིན་ཏུ་ མང་ །
དེ་ལ་ བྱ་སླ་ བྱ་དཀའ་ ཡང་ །
དཀའ་ཞིག་ དག་ནི་ བསྟན་པར་བྱ ॥ ༣

मानेन मानेन सखि प्रणयोभूत्प्रिये जने ।
खण्डिता कण्ठमाश्लिष्य तमेव कुरु सत्रपम् ॥४॥

གྲོགས་མོ་ མཛའ་བོའི་སྐྱེ་བོ་ལ །
ཁེངས་པ་ འདི་དང་ འགྲོགས་མ་བྱེད །
བསྐྱུས་པའི་ མགྲིན་པ་ ནས་ འཁྱུད་ལ །
དེ་ཉིད་ ངོ་ཚ་ལྡན་པར་ གྱིས ॥ ༤

मेघानादेन हंसानां मदनोमदनोदिना ।
नुन्नमानं मनः स्त्रीणां सह रत्या विगाहते ॥५॥

ངང་པ་རྣམས་ཀྱི་ དྲེགས་ འཛོམས་པ །
སྤྲིན་གྱི་ སྒྲ་ ཡིས་ གྲོས་བྱེད་ནི །
དགའ་མ་ དང་ བཅས་ བུད་མེད་ཀྱི །
ཁངས་བྲལ་ཡིད་ལ་ འཇུག་པར་བྱེད ॥ ༥

राजन्वत्यः प्रजा जाता भवन्तं प्राप्य साम्प्रतं ।
चतुरं चतुरंभोधिरसनोर्वीकरग्रहे ॥६॥

ཆུ་གཏེར་བཞི་ཡི་ སྐ་རགས་ཅན །
ས་ཡི་ལག་ དཔྱ་འཛིན་ལ་ མཁས །
ཁྱོད་ཉིད་ ཐོབ་ནས་ ད་ལྟ་ནི །
སྐྱེ་དགུ་ རྒྱལ་པོ་ བཟང་ལྡན་གྱུར ॥ ༦

अरण्यं कैश्चिदाक्रान्तमन्यैः सद्म दिवौकसां ।
पदातिरथनागाश्वरहितैरहितैस्तव ॥७॥

ཀང་ཐང་ ཤིང་རྟ་ གླང་པོ་དང་ །
རྟ་དང་ བྲལ་བ་ ཁྱོད་ཀྱི་ དགྲ །

འགའ་ ཞིག་ ནགས་དང་ གཞན་དག་ནི །
ལྷ་ རྣམས་དག་གི་ གནས་སུ་ སོང་ ॥ ༧

मधुरं मधुरम्भोजवदने वद नेत्रयोः ।
विभ्रमम्भ्रमरभ्रान्त्या विडम्बयति किन्न्विदं ॥८॥

ཆུ་སྐྱེས་གདོང་ལྡན་ མིག་དག་གི །
རྣམ་འཕྲུལ་ ཡིད་འོང་ འདི་ལ་ ནི །
དབྱིད་ཀྱི་ བུང་བའི་རྣམ་འཕྲུལ་གྱིས །
ཅི་འདྲ་བྱེད་པ་ ཅི་ ཡིན་ སྨྲོས་ ॥ ༨

वारुणो वा रणोद्दामो हयो वा स्मरदुर्धरः ।
न यतो नयतोऽन्तं नस्तदहो वि[37b]**क्रमस्तव ॥९॥**

འདོད་པ་ གཡུལ་དུ་ དཔའ་བ་ཡི །
གླང་པོའམ་ གཟུང་དཀའ་ རྟ་མེད་ཀྱིས །
གང་ཕྱིར་ •བདག་ཅག་ མཐར་བྱས་པ །
དེ་ཕྱིར་ ཁྱོད་ཀྱི་ རྣམ་གནོན་ མཚར ॥ ༩

राजितैराजितैक्ष्ण्येन जीयते त्वादृशैर्नृपैः ।
नीयते च पुनस्तृप्तिं वसुधा वसुधारया ॥१०॥

གཡུལ་དུ་ རྣོ་བས་ མཛོས་པ་ཡི །
མི་བདག་ ཁྱོད་འདྲས་ ནོར་འཛིན་ ནི །
རྒྱལ་བར་གྱུར་ཏེ་ ནོར་རྒྱུན་གྱིས །
ཚིམ་པ་དག་ ཀྱང་ ཐོབ་པར་གྱུར ॥ ༡༠

करोति सहकारस्य कलिकोत्कलिकोत्तरं ।
मन्मनोमन्मनोप्येष मत्तकोकिलनिस्वनः ॥११॥

ས་ཧ་ཀཱ་རའི་ མེ་ཏོག་ གསར །
བདག་ ཡིད་ མཆོག་ཏུ་ སྲེད་ལྡན་བྱེད །
ཁུ་བྱུག་ མྱོས་པ་དག་གི་སྒྲ །
ཡིད་དུ་འོང་བ་ འདིས་ ཀྱང་ངོ ॥ ༡༡

कथं त्वदुपलम्भाशा विहताविह तादृशीं ।
अवस्था नालमारोढुमङ्गनामङ्गनाशिनी ॥१२॥

ཁྲོད་ལ་ དམིགས་ པའི་རི་བ་ དང་ །
མ་བྲལ་ འདི་ལ་ དེ་འདྲ་ ཡི །
གནས་སྐབས་ ལུས་ནི་ འཇིག་བྱེད་པས །
བུད་མེད་ འཇོགས་ ནུས་ ཅི་ལྟར་མིན ॥ ༡༢

निगृह्य नेत्रे कर्षन्ति बालपल्लवशोभिना ।
तरुणा तरुणान्कृष्टानलिनो नलिनोन्मुखाः ॥१३॥

ཡལ་འདབ་ གསར་པས་ མཛེས་པ་ཡི །
ལྗོན་པས་ དྲངས་པའི་ གཞོན་ནུ་རྣམས །
པདྨ་ མདོན་ ཕྱོགས་ བུང་བ་ཡིས །
མིག་ནས་ བཟུང་སྟེ་ འགུགས་པར་བྱེད ॥ ༡༣

विशदा विशदामत्तसारसे सारसे जले ।
कुरुते कुरुतेनेयं हंसो मामन्तकामिषं ॥१४॥

སྐྱོས་པའི་ བཞད་ནི་ རབ་འཇུག་པ །
རྫིང་གི་ཆུ་ལ་ དཀར་བ་ཡི །

ངང་མོ་ འདི་ཡི་ ཙ་ཙོ་ ཡིས །
བདག་ནི་ མཐར་བྱེད་ཟས་སུ་བྱེད ॥ ༡༣

विषमं विषमन्वेति मदनं मदनन्दनः ।
सहेन्दुकलयापोढमलया मलयानिलः ॥१५॥

དྲི་བྲལ་ ཟླ་བའི་ཆ་དག་ དང་ །
ལྷན་ཅིག་ མ་ལ་ཡ་ཡི་རླུང་ །
བདག་ དགའ་མི་ བྱེད་འདོད་པ་ ནི །
མི་བཟད་དུག་གི་ རྗེས་སུ་འགྲོ ॥ ༡༤

मानिनी मानिनीषुस्ते निषङ्गत्वमनङ्ग मे ।
हारिणी हारिणी[38a]शर्म्म तनुतां तनुतां यतः ॥१६॥

བདག་ སྙེན་མི་འདོད་ ཁེངས་པ་ཅན །
རོ་ཞལ་དང་ལྡན་ འཕྲོག་བྱེད་མ །
ལུས་མེད་ ཁྱོད་ཀྱི་ རྔང་པ་ ཉིད །
ཕྲ་གུར་ བདག་ འགྲོགས་ བདེ་རྒྱས་ མཛོད ॥ ༡༥

जयता त्वन्मुखेनास्मानकथं न कथं जितं ।
कमलं कमलंकुर्वदलिमद्दलिमत्प्रिये ॥१७॥

ཁྱད་ཀྱི་ གདོང་གིས་ བདག་ ལས་ རྒྱལ། །
ཆུ་ཡི་རྒྱན་ གྱུར་ བུང་བ་ཅན། །
འདབ་ལྡན་ པདྨ་ གདམ་ མེད་ལས། །
ཅི་ལྟར་ མི་རྒྱལ་ བདག་ དགའམ ॥ ༡༧

रमणी रमणीया मे पाटलापाटलांशुका ।
वारुणीवारुणीभूतसौरभा सौरभास्पदं ॥१८॥

ཉི་མའི་འོད་ཀྱིས་ དམར་གྱུར་པའི། །
ཆུ་ལྷ་མོ་ བཞིན་ པཱ་ཊ་ལ། །
དཀར་དམར་ གོས་ཅན་ དྲི་བཟངས་ གནས། །
བདག་གི་ དགའ་མ་ དགའ་བར་བྱ ॥ ༡༨

इति पादादियमकमव्यपेतं विकल्पितं ।
व्यपेतस्यापि वर्ण्यन्ते विकल्पास्तत्र केचन ॥१९॥

དེ་ལྟར་ རྐང་པའི་ ཐོག་མ་ཡི །
ཟུང་ལྡན་ བར་ཆོད་མེད་ རྣམ་རྟོག །
དེ་ནི་ བར་དུ་ཆོད་པ་ ཡི །
རྣམ་རྟོག་ འགའ་ཡང་ བསྟན་པར་བྱ ॥ ༡༩

मधुरेणदृशां मानं मधुरेण सुगन्धिना ।
सहकारोद्गमेनैव शब्दशेषं करिष्यति ॥२०॥

ས་ཧ་ཀཱ་ར་ ལས་ འཁྲུངས་ ཉིད །
ཡིད་འོང་ དྲི་བཟངས་ལྡན་པ་ ཡིས །
དབྱིད་ཀྱི་ ཨེ་ཊའི་ མིག་ཅན་གྱི །
ཁེངས་པ་ སྒྲ་ཡི་ ལྷག་མར་བྱེད ॥ ༢༠

करोऽतिताम्रो रामाणान्तन्त्रीताडनविभ्रमं ।
करोति सेर्ष्यं कान्ते वा श्रवणोत्पलताडनं ॥२१॥

དགའ་མའི་ ལག་པ་ ཤིན་ཏུ་ དམར །
རྒྱུད་མངས་ལ་ བསྣུན་ རྣམ་འཕྲུལ་ལ །

ཕྲག་དོག་ ལྡན་ནམ་ མཛེད་བོ་ལའང་ །
ཉ་བའི་ཨུ་ཏྤལ་གྱིས་ བསྐྲུན་བྱེད ॥ ༢༡

सकलापोल्लसनया कलापिन्याऽनुनृत्यते ।
मेघाली नर्त्तिता वातैः सकलापो विमुञ्चति ॥२२॥

རླུང་ གྱིས་ གར་ བསྒྱུར་ སྤྲིན་གྱི་ཕྲེང་ །
མཐའ་དག་ ཆུ་ནི་ འཐོར་བར་བྱེད །
དེ་རྗེས་ མཇུག་ མ་རབ་བསྒྲང་བའི །
མཇུག་སྒྲོ་ལྡན་པ་ གར་དག་བྱེད ॥ ༢༢

स्वयमेव गलन्मानकलि कामिनि[38b]ते मनः ।
कलिकामथ नीपस्य दृष्ट्वा कां नु स्पृद्दशेशां ॥२३॥

འདོད་ལྡན་མ་ དག་ ཁྱོད་ཀྱི་ ཡིད །
ཁེངས་རྒྱོད་ རང་ཉིད་ ཉམས་འགྱུར་དེ །
ནཱི་པའི་ཀ་ལི་ཀཱ་ མཐོང་ན །
གནས་སྐབས་ ཅི་ལ་ རེག་འགྱུར་རམ ॥ ༢༣

आरुह्याक्रीडशैलस्य चन्द्रकान्तस्थलीमिमां ।
नृत्यत्येष लसच्चारुचन्द्रकान्तः शिखावलः ।।२४।।

རྩེ་དགའི་ རི་ཡི་ཟླ་འོད་ཀྱི།
ཐང་འདི་ལ་ནི་ འཛེགས་ གྱུར་ ནས།
མདོངས་མཐའ་ མཆོག་ཏུ་ རབ་མཛེས་པའི།
གཙུག་ཕུད་ཅན་ འདི་ གར་བྱེད་དོ།། ༢༨

उद्धृता राजकादुर्वी ध्रियतेद्य भुजेन ते ।
वराहेणोद्धृता यासौ वराहेरुपरि स्थिता ।।२५।।

གང་ཞིག་ སྦྲུལ་ མཆོག་ སྟེང་ གནས་ཤིང་།
ཕག་པས་ གཟུང་བའི་ ས་ འདི་ནི།
རྒྱལ་པོའི་ ཚོགས་ ལས་ རབ་བླངས་ ནས།
ད་ལྟ་ ཁྱོད་ཀྱི་ ལག་པས་ བཟུང་།། ༢༩

करेण ते रणेष्वन्तकरेण द्विषतां हताः ।
करेणवः क्षरद्रक्ता भान्ति सन्ध्याघना इव ।।२६।।

གཡུལ་དུ་ དགྲ་ཡི་ གླང་པོ་རྣམས །
ཁྱོད་ཀྱི་ ལག་པ་ མཐར་བྱེད་ཀྱིས །
བསྣན་པའི་ཁྲག་ ནི་ རབ་ཟག་པ །
ཐུན་མཚམས་དག་གི་ སྤྲིན་ བཞིན་ མཛེས ॥ ༢༦

परागतरुराजीव वातैर्ध्वस्ता भटैश्चमूः ।
परागतमिव क्वापि परागततमम्बरं ॥२७॥

རླུང་གིས་ རི་ཡི་ཤིང་ཕྲེང་ བཞིན །
གཞན་གྱི་ སྐྱེ་ནི་ དཔའ་བོས་ བཅོམ །
མཐའ་ནི་ ག་ཤེད་ སོང་བ་ བཞིན །
རྡུལ་གྱིས་ ནམ་མཁའ་ ཁྱབ་པར་གྱུར ॥ ༢༧

पातु वो भगवान्विष्णुः सदा नवघनद्युतिः ।
स दानवकुलध्वंसी सदानवरदन्तिहा ॥२८॥

ལེགས་ལྡན་ ཆུ་འཛིན་ གསར་པའི་འོད །
ལྷ་མིན་དག་གི་རིགས་ཉམས་བྱེད །

ཆད་ལྡན་ གླང་པོ་ མཆོག་ བཅོམ་པ།
ཁྱབ་འཇུག་རེས་ ཁྱོད་ རྟག་ཏུ་ སྲུངས། ༢༨

कमलेस्समकेशान्ते कमलेर्ष्याकरं मुखं ।
कमलेख्यं करोषि त्वं कमले[39a]वोन्मदिष्णुषु ॥२९॥

ཁྱོད་ཀྱི་མགོ་སྐྲ་བུང་བ་འདྲ།
གདོང་ནི་ པདྨ་ ཕྲག་དོག་བྱེད།
དཔལ་གྱིས་ བཞིན་དུ་ རབ་མྱོས་པ།
ཁྱོད་ཀྱིས་ སུ་ཞིག་ རྗེ་མི་བྱེད། ༢༩

मुदा रमणमन्वीतमुदारमणिभूषणाः ।
मदभ्रमदृशः कर्तुमदभ्रजघनाः क्षमाः ॥३०॥

རྒྱ་ཆེ་ རིན་ཆེན་ རྒྱན་དང་ལྡན།
རྒྱགས་པས་ མིག་ འཁོར་ ཛ་གྷ་ན།
ཆུང་བ་ མིན་པས་ མཛེའ་བོ་ ནི།
དགའ་བ་ལྡན་པ་ བྱ་བར་བཟོད། ༣༠

उदितैरन्यपुष्टानामारुतैर्मे हतं मनः ।
उदितैरपि ते दूति मारुतैरपि दक्षिणैः ॥३१॥

གཞན་གསོས་རྣམས་ཀྱིས་ བསྒྲགས་པ་ དང་ །
ཁྱོད་ཀྱི་ བརྗོད་པའི་སྒྲ་ དང་ ནི །
ལྷོ་ཡི་ཕྱོགས་ཀྱི་ རླུང་གིས་ ཀྱང་ །
བདག་ཡིད་ ཕྲོགས་སོ་ ཕོ་ཉ་མོ ॥ ༣༡

सुराजितह्रियो यूनां तनुमध्यासते स्त्रियः ।
तनुमध्या क्षरत्स्वेदसुराजितमुखेन्दवः ॥३२॥

སྐེད་པ་ཕྲ་ ཞིང་ རྔུལ་ཟག་པས །
གདོང་གི་ཟླ་བ་ རབ་མཛེས་པའི །
བུད་མེད་ ཆང་གིས་ ངོ་ཚ་ བཅོམ །
སྐྱེས་པའི་ལུས་ལ་ འཛོགས་པར་བྱེད ॥ ༣༢

इति व्यपेतयमकप्रभेदोप्येष दर्शितः ।
अव्यपेतव्यपेतात्मा विकल्पोप्यस्ति तद्यथा ॥३३॥

དེ་ལྟར་ བར་ཆོད་ཟུང་ལྡན་གྱི །
རབ་ཏུ་དབྱེ་བ་ འདི་ཡང་ བསྟན །
བར་ཆོད་ མ་ཆོད་ བདག་ཉིད་ཀྱི །
རྣམ་རྟོག་ ཀུང་ ཡོད་ འདི་ལྟ་སྟེ ॥ ༣༣

सालं सालंबकलिकासालं सालं न वीक्षितुं ।
नालीनालीनवकुलानालो नालीकिनीरपि ॥३४॥

ཀ་ལི་ཀཱ་ འཁྱུད་ ཡལ་ག་ཅན །
སཱ་ལ་ བལྟ་བར་ དེ་ མི་ནུས །
བ་ཀུ་ལར་ ཆགས་ བུང་བ་ དང་ །
གྲོགས་མོས་ པདྨ་ཅན་ ཡང་ མིན ॥ ༣༤

कालं कालमनालक्ष्यतारतारकमीक्षितुं ।
तारतारम्यरसितं कालं कालमहाघनं ॥३५॥

སྤྲིན་ནག་ ཆེན་པོ་ལྡན་པའི་དུས །
སྐར་དང་ རྒྱུ་སྐར་ ཀུན་ མི་མཆོན །

གསང་ འཕྲོར་ དགའ་བ་ སྒྲོགས་བྱེད་པ །
དུས་འདྲ་ སུ་ཡིས་ བལྟ་བར་ནུས ॥ ༣༥

याम यामत्रयाधीनायामया मरणं निशा ।
यामयाम धि[39b]याऽस्वत्याया मया मथितैव सा ॥३६॥

